# TaittiriyAranyakam aruNaprashnaH

# તૈત્તિરીયારણ્યકમ્ અરુણપ્રશ્નઃ

## Document Information

Text title : taittirIya AraNyaka 1 aruNaprashnaH

File name : aranyaka.itx

Category : veda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer

Proofread by : Rajagopal Iyer

Description-comments : The Mantrams of AaruNam (AaruNa Kethuka Saayanam) deal largely with Surya UpAsanA. That is why it is called Surya Upanishad.

Latest update : February 18, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 18, 2025

*sanskritdocuments.org*

# તૈત્તિરીયારણ્યકમ્ અરુણપ્રશ્નઃ

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
આપમાપામપઃ સર્વાઃ । અસ્માદસ્માદિતોઽમુતઃ ॥ ૧ ॥

અગ્નિર્વાયુશ્ચ સૂર્યશ્ચ । સહ સંચસ્કરર્દ્ધિયા ।
વાય્વશ્વા રશ્મિપતયઃ । મરીચ્યાત્મનો અદ્રુહઃ ।
દેવીર્ભુવનસૂવરીઃ । પુત્રવત્વાય મે સુત ।
મહાનામ્નીર્મહામાનાઃ । મહસો મહસસ્સ્વઃ ।
દેવીઃ પર્જન્યસૂવરીઃ । પુત્રવત્વાય મે સુત ॥ ૨ ॥

અપાશ્ન્યુષ્ણિમપા રક્ષઃ । અપાશ્ન્યુષ્ણિમપારઘમ્ ।
અપાઘ્રામપ ચાવર્તિમ્ । અપદેવીરિતો હિત ।
વજ્રં દેવીરજીતાꣳશ્ચ । ભુવનં દેવસૂવરીઃ ।
આદિત્યાનદિતિં દેવીમ્ । યોનિનોર્ધ્વમુદીષત ।
શિવાનશ્શન્તમા ભવન્તુ । દિવ્યા આપ ઓષધયઃ ।
સુમૃડીકા સરસ્વતી । મા તે વ્યોમ સંદૃશિ ॥ ૩ ॥

સ્મૃતિઃ પ્રત્યક્ષમૈતિહ્યમ્ । અનુમાનશ્ચતુષ્ટયમ્ ।
એતૈરાદિત્યમણ્ડલમ્ । સર્વૈરેવ વિધાસ્યતે ।
સૂર્યો મરીચિમાદત્તે । સર્વસ્માદ્ભુવનાદધિ ।
તસ્યાઃ પાકવિશેષેણ । સ્મૃતં કાલવિશેષણમ્ ।
નદીવ પ્રભવાત્કાચિત્ । અક્ષય્યાત્સ્યન્દતે યથા ॥ ૪ ॥

તાન્નદ્યોઽભિસમાયન્તિ । સોરુસ્સતી ન નિવર્તતે ।
એવન્નાનાસમુત્થાનાઃ ।
કાલાસ્સંવત્સરꣳ શ્રિતાઃ । અણુશશ્ચ મહશશ્ચ ।
સર્વે સમવયન્ત્રિતમ્ । સતૈસ્સર્વૈસ્સમાવિષ્ટઃ ।
ઊરુસ્સન્ન નિવર્તતે અધિસંવત્સરં વિદ્યાત્ । તદેવ લક્ષણે ॥ ૫ ॥

અણુભિશ્ચ મહદ્ભિશ્ચ । સમારૂઢઃ પ્રદૃશ્યતે ।
સંવત્સરઃ પ્રત્યક્ષેણ । નાધિસત્વઃ પ્રદૃશ્યતે ।
પટરો વિક્લિધઃ પિઙ્ગઃ । એતદ્વરુણલક્ષણમ્ ।
યત્રૈતદુપદૃશ્યતે । સહસ્રં તત્ર નીયતે ।
એકꣳ હિ શિરો નાના મુખે । કૃત્સ્નમ્ તદૃતુલક્ષણમ્ ॥ ૬ ॥

ઉભયતસ્સમેન્દ્રિયાણિ । જલ્પિતં ત્વેવ દિહ્યતે ।
શુક્લકૃષ્ણે સંવત્સરસ્ય । દક્ષિણવામયોઃ પાર્શ્વયોઃ ।
તસ્યૈષા ભવતિ । શુક્રં તે અન્યદ્યજતં તે અન્યત્ ।
વિષુરૂપે અહની દ્યૌરિવાસિ । વિશ્વા હિ માયા અવસિ સ્વધાવઃ ।
ભદ્રા તે પૂષન્નિહ રાતિરસ્ત્વિતિ । નાત્ર ભુવનમ્ । ન પૂષા ।
ન પશવઃ । નાદિત્યસ્સંવત્સર એવ પ્રયક્ષેણ પ્રિયતમં વિદ્યાત્ ।
એતદ્વૈ સંવત્સરસ્ય પ્રિયતમꣳ રૂપમ્ । યોઽસ્ય મહાનર્થ ઉત્પત્સ્યમાનો ભવતિ ।
ઇદં પુણ્યં કુરુષ્વેતિ । તમાહરણં દદ્યાત્ ॥ ૭ ॥

સાકંજાનાꣳ સપ્તથમાહુરેકજમ્ । ષડુદ્યમા ઋષયો દેવજા ઇતિ ।
તેષામિષ્ટાનિ વિહિતાનિ ધામશઃ । સ્થાત્રે રેજન્તે વિકૃતાનિ રૂપશઃ ।
કો નુ મર્યા અમિથિતઃ । સખા સખાયમબ્રવીત્ ।
જહાકો અસ્મ દીષતે । યસ્તિત્યાજ સખિવિદꣳ સખાયામ્ ।

ન તસ્ય વાચ્યપિ ભાગો અસ્તિ । યદીꣳશૃણોત્યલકꣳશૃણોતિ ॥ ૮ ॥

ન હિ પ્રવેદ સુકૃતસ્ય પન્થામિતિ । ઋતુરૃતુના નુદ્યમાનઃ ।
વિનનાદાભિધાવઃ । ષષ્ટિશ્ચ ત્રિꣳશકા વલ્ગાઃ ।
શુક્લકૃષ્ણૌ ચ ષાષ્ટિકૌ । સારાગવસ્ત્રૈર્જરદક્ષઃ ।
વસન્તો વસુભિસ્સહ ।
સંવત્સરસ્ય સવિતુઃ ।
પ્રૈષકૃત્પ્રથમઃ સ્મૃતઃ । અમૂનાદયતેત્યન્યાન્ ॥ ૯ ॥

અમૂꣳશ્ચ પરિરક્ષતઃ । એતા વાચઃ પ્રયુજ્યન્તે ।
યત્રૈતદુપદૃશ્યતે । એતદેવ વિજાનીયાત્ ।
પ્રમાણં કાલપર્યયે । વિશેષણં તુ વક્ષ્યામઃ ।
ઋતૂનાં તન્નિબોધત । શુક્લવાસા રુદ્રગણઃ ।
ગ્રીષ્મેણાઽઽવર્તતે સહ । નિજહન્ પૃથિવીꣳ સર્વામ્ ॥ ૧૦ ॥

જ્યોતિષાઽપ્રતિખ્યેન સઃ । વિશ્વરૂપાણિ વાસાꣳસિ ।
આદિત્યાનાં નિબોધત । સંવત્સરીણં કર્મફલમ્ ।
વર્ષાભિર્દદતાꣳ સહ । અદુઃખો દુઃખચક્ષુરિવ ।
તદ્માઽઽપીત ઇવ દૃશ્યતે । શીતેનાવ્યથયન્નિવ ।
રુરુદક્ષ ઇવ દૃશ્યતે । હ્લાદયતે જ્વલતશ્ચૈવ ।
શામ્યતશ્ચાસ્ય ચક્ષુષી । યા વૈ પ્રજા ભ્રꣳશ્યન્તે ।
સંવત્સરાત્તા ભ્રꣳશ્યન્તે । યાઃ પ્રતિતિષ્ઠન્તિ ।
સંવત્સરે તાઃ પ્રતિતિષ્ઠન્તિ । વર્ષાભ્ય ઇત્યર્થઃ ॥ ૧૧ ॥

અક્ષિદુઃખોત્થિતસ્યૈવ । વિપ્રસન્ને કનીનિકે ।
આઙ્ક્તેચાદ્ગણં નાસ્તિ । ઋભૂણાં તન્નિબોધત ।
કનકાભાનિ વાસાꣳસિ । અહતાનિ નિબોધત ।
અન્નમશ્નીત મૃજ્મીત । અહં વો જીવનપ્રદઃ ।
એતા વાચઃ પ્રયુજ્યન્તે । શરદ્યત્રોપદૃશ્યતે ॥ ૧૨ ॥

અભિધૂન્વન્તોઽભિઘ્નન્ત ઇવ । વાતવન્તો મરુદ્ગણાઃ ।
અમુતો જેતુમિષુમુખામિવ । સન્નદ્ધાસ્સહ દદૃશે હ ।

અપધ્વસ્તૈર્વસ્તિવર્ણૈરિવ । વિશિખાસઃ કપર્દિનઃ ।
અક્રુદ્ધસ્ય યોત્સ્યમાનસ્ય । ક્રુદ્ધસ્યેવ લોહિની ।
હેમતશ્ચક્ષુષી વિદ્યાત્ । અક્ષણયોઃ ક્ષિપણોરિવ ॥ ૧૩ ॥

દુર્ભિક્ષં દેવલોકેષુ । મનૂનામુદકં ગૃહે ।
એતા વાચઃ પ્રવદન્તીઃ । વૈદ્યુતો યાન્તિ શૈશિરીઃ ।
તા અગ્નિઃ પવમના અન્વૈક્ષત । ઇહ જીવિકામપરિપશ્યન્ ।
તસ્યૈષા ભવતિ । ઇહેહવસ્સ્વતપસઃ ।
મરુતસ્સૂર્યત્વચઃ । શર્મ સપ્રથા આવૃણે ॥ ૧૪ ॥

અતિતામ્રાણિ વાસાꣳસિ । અષ્ટિવજ્રિશતઘ્નિ ચ ।
વિશ્વે દેવા વિપ્રહરન્તિ । અગ્નિજિહ્વા અસશ્ચત ।
નૈવ દેવો ન મર્ત્યઃ । ન રાજા વરુણો વિભુઃ ।
નાગ્નિર્નેન્દ્રો ન પવમાનઃ । માતૃક્કચ્ચન વિદ્યતે ।
દિવ્યસ્યૈકા ધનુરાર્ત્નિઃ । પૃથિવ્યામપરા શ્રિતા ॥ ૧૫ ॥

તસ્યેન્દ્રો વમ્રિરૂપેણ । ધનુર્જ્યામછિનત્સ્વયમ્ ।
તદિન્દ્રધનુરિત્યજ્યમ્ । અભ્રવર્ણેષુ ચક્ષતે ।
એતદેવ શંયોર્બાર્હસ્પત્યસ્ય । એતદ્રુદ્રસ્ય ધનુઃ ।
રુદ્રસ્ય ત્વેવ ધનુરાર્ત્નિઃ । શિર ઉત્પિપેષ ।
સ પ્રવર્ગ્યોઽભવત્ । તસ્માદ્યસ્સપ્રવર્ગ્યેણ યજ્ઞેન યજતે ।
રુદ્રસ્ય સ શિરઃ પ્રતિદધાતિ । નૈનꣳરુદ્ર આરુકો ભવતિ । ય એવં વેદ ॥ ૧૬ ॥

અત્યૂર્ધ્વાક્ષોઽતિરશ્ચાત્ । શિશિરઃ પ્રદૃશ્યતે ।
નૈવ રૂપં ન વાસાꣳસિ । ન ચક્ષુઃ પ્રતિદૃશ્યતે ।
અન્યોન્યં તુ ન હિꣳસ્રાતઃ । સતસ્તદ્દેવલક્ષણમ્ ।
લોહિતોઽક્ષ્ણિ શારશીર્ષ્ણિઃ । સૂર્યસ્યોદયનં પ્રતિ ।
ત્વં કરોષિન્યઞ્જલિકામ્ । ત્વં કરોષિ નિજાનુકામ્ ॥ ૧૭ ॥

નિજાનુકામેન્યઞ્જલિકા । અમી વાચમુપાસતામિતિ ।
તસ્મૈ સર્વ ઋતવો નમન્તે । મર્યાદાકરત્વાત્પ્રપુરોધામ્ ।
બ્રાહ્મણ આપ્નોતિ । ય એવં વેદ । સ ખલુ સંવત્સર એતૈસ્સેનાનીભિસ્સહ ।

ઇન્દ્રાય સર્વાન્કામાનભિવહતિ । સ દ્રપ્સઃ । તસ્યૈષા ભવતિ ॥ ૧૮ ॥

અવદ્રપ્સો અ શુમતીમતિષ્ઠત્ । ઇયાનઃ કૃષ્ણો દશભિસ્સહસ્રૈઃ ।

આવર્તમિન્દ્રઃ શચ્યા ધમન્તમ્ । ઉપસ્નુહિ તં નૃમણામથદ્રામિતી ।

એતયૈવેન્દ્રઃ સલાવૃક્યા સહ । અસુરાન્ પરિવૃશ્ચતિ ।

પૃથિવ્ય શુમતી । તામન્વવસ્થિતઃ સંવત્સરો દિવં ચ ।

નૈવં વિદુષાઽઽચાર્યાન્તેવાસિનૌ । અન્યોન્યસ્મૈ દ્રુહ્યાતામ્ । યો દ્રુહ્યતિ ।

ભ્રશ્યતે સ્વર્ગાલ્લોકાત્ । ઇત્યૃતુમણ્ડલાનિ ।

સૂર્યમણ્ડલાન્યાખ્યાયિકાઃ । અત ઊર્ધ્વ સનિર્વચનાઃ ॥૧૯ ॥

આરોગો ભ્રાજઃ પટરઃ પતઙ્ગઃ । સ્વર્ણરો જ્યોતિષિમાન્ વિભાસઃ ।

તે અસ્મૈ સર્વે દિવમાતપન્તિ । ઊર્જં દુહાના અનપસ્ફુરન્ત ઇતિ ।

કશ્યપોઽષ્ટમઃ । સ મહામેરું ન જહાતિ ।

તસ્યૈષા ભવતિ । યત્તે શિલ્પંકશ્યપ રોચનાવત્ ।

ઇન્દ્રિયાવત્પુષ્કલં ચિત્રભાનુ । યસ્મિન્ત્સૂર્યા અર્પિતાસ્સપ્ત સાકમ્ ॥ ૨૦ ॥

તસ્મિન્ રાજાનમધિવિશ્રયેમમિતિ । તે અસ્મૈ સર્વે કશ્યપાજ્જ્યોતિર્લભન્તે ।

તાન્ત્સોમઃ કશ્યપાદધિનિર્દ્ધમતિ । ભ્રસ્તાકર્મકૃદિવૈવમ્ ।

પ્રાણો જીવાનીન્દ્રિયજીવાનિ । સપ્ત શીર્ષણ્યાઃ પ્રાણાઃ ।

સૂર્યા ઇત્યાચાર્યાઃ । અપશ્યમહમેતાન્ત્સપ્ત સૂર્યાનિતિ ।

પઞ્ચકર્ણો વાત્સ્યાયનઃ । સપ્તકર્ણશ્ચ પ્લાક્ષિઃ ॥ ૨૧ ॥

See a note in the end on adding t before sapta for apashyamahametAntsapta

આનુશ્રાવિક એવ નૌ કશ્યપ ઇતિ । ઉભૌ વેદયિતે ।

ન હિ શેકુમિવ મહામેરું ગન્તુમ્ । અપશ્યમહમેત્સૂર્યમણ્ડલં પરિવર્તમાનમ્ ।

ગાર્ગ્યઃ પ્રાણત્રાતઃ । ગચ્છન્ત મહામેરુમ્ । એકં ચાજહતમ્ ।

ભ્રાજપટરપતઙ્ગા નિહને । તિષ્ઠન્નાતપન્તિ । તસ્માદિહ તપ્ત્રિતપાઃ ॥ ૨૨ ॥

અમુત્રેતરે । તસ્માદિહાતપ્ત્રિતપાઃ । તેષામેષા ભવતિ ।

સપ્ત સૂર્યા દિવમનુપ્રવિષ્ટાઃ । તાનન્વેતિ પથિભિર્દક્ષિણાવાન્ ।

તે અસ્મૈ સર્વે ઘૃતમાતપન્તિ । ઊર્જં દુહાના અનપસ્ફુરન્ત ઇતિ ।

સપ્તર્ત્વિજસ્સૂર્યા ઇત્યાચાર્યાઃ । તેષામેષા ભવતિ । સપ્ત દિશો નાનાસૂર્યાઃ ॥ ૨૩ ॥

સપ્ત હોતાર ઋત્વિજઃ । દેવા આદિત્યા યે સપ્ત ।
તેભિસ્સોમાભીરક્ષણ ઇતિ । તદપ્યામ્નાયઃ ।
દિગ્ભ્રાજ ઋતૂન્ કરોતિ । એતયૈવાવૃતા સહસ્રસૂર્યતાયા ઇતિ વૈશંપાયનઃ ।
તસ્યૈષા ભવતિ । યદ્દ્યાવ ઇન્દ્ર તે શત ઁ શતં ભૂમીઃ ।
ઉતસ્યુઃ । નત્વા વજ્રિન્ સહસ્ર ઁ સૂર્યાઃ ॥ ૨૪ ॥

અનુનજાતમષ્ટ રોદસી ઇતિ । નાનાલિઙ્ગત્વાદૃતૂનાં નાનાસૂર્યત્વમ્ ।
અષ્ટૌ તુ વ્યવસિતા ઇતિ । સૂર્યમણ્ડલાન્યષ્ટાત ઊર્ધ્વમ્ ।
તેષામેષા ભવતિ । ચિત્રં દેવાનામુદગાદનીકમ્ ।
ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્ને । આપ્રા દ્યાવાપૃથિવી અન્તરિક્ષમ્ ।
સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચેતિ ॥ ૨૫ ॥

ક્વેદમભ્રન્નિવિશતે । ક્વાય ઁસંવત્સરો મિથઃ ।
ક્વાહઃ ક્વેયન્દેવ રાત્રી । ક્વ માસા ઋતવઃ શ્રિતાઃ ।
અર્દ્ધમાસા મુહૂર્તાઃ । નિમેષાસ્તુટિભિસ્સહ ।
ક્વેમા આપો નિવિશન્તે । યદીતો યાન્તિ સમ્પ્રતિ ।
કાલા અપ્સુનિવિશન્તે । આપસ્સૂર્યે સમાહિતાઃ ॥ ૨૬ ॥

અભ્રાણ્યપઃ પ્રપદ્યન્તે । વિદ્યુત્સૂર્યે સમાહિતા ।
અનવર્ણે ઇમે ભૂમી । ઇયં ચાઽસૌ ચ રોદસિ ।
કિ ઁ સ્વિદત્રાન્તરા ભૂતમ્ । યેનેમે વિધૃતે ઉભે ।
વિષ્ણુના વિધૃતે ભૂમી । ઇતિ વત્સસ્ય વેદના ।
ઇરાવતી ધેનુમતી હિ ભૂતમ્ । સૂયવસિની મનુષે દશસ્યે ॥ ૨૭ ॥

વ્યષ્ટભ્નાદ્રોદસી વિષ્ણવેતે । દાધર્થ પૃથિવીમભિતો મયૂખૈઃ ।
કિન્તદ્વિષ્ણોર્બલમાહુઃ । કા દીપ્તિઃ કિં પરાયણમ્ ।
એકો યદ્ધારયદ્દેવઃ । રેજતી રોદસી ઉભે ।
વાતાદ્વિષ્ણોર્બલમાહુઃ । અક્ષરાદ્દીપ્તિરુચ્યતે ।
ત્રિપદાદ્ધારયદ્દેવઃ । યદ્વિષ્ણોરેકમુત્તમમ્ ॥ ૨૮ ॥

અગ્નયો વાયવશ્ચૈવ । એતદસ્ય પરાયણમ્ ।

પૃચ્છામિ ત્વા પરં મૃત્યુમ્ । અવમં મધ્યમઞ્ચતુમ્ ।
લોકઞ્ચ પુણ્યપાપાનામ્ । એતત્પૃચ્છામિ સમ્પ્રતિ ।
અમુમાહુઃ પરં મૃત્યુમ્ । પવમાનં તુ મધ્યમમ્ ।
અગ્નિરેવાવમો મૃત્યુઃ । ચન્દ્રમાશ્ચતુરુચ્યતે ॥ ૨૯ ॥

અનાભોગાઃ પરં મૃત્યુમ્ । પાપાસ્સંયન્તિ સર્વદા ।
આભોગાસ્ત્વેવ સંયન્તિ । યત્ર પુણ્યકૃતો જનાઃ ।
તતો મધ્યમમાયન્તિ । ચતુમગ્નિં ચ સમ્પ્રતિ ।
પૃચ્છામિ ત્વા પાપકૃતઃ । યત્ર યાતયતે યમઃ ।
ત્વન્નસ્તદ્બ્રહ્મન્ પ્રબ્રૂહિ । યદિ વેત્થાઽસતો ગૃહન્ ॥ ૩૦ ॥

કશ્યપાદુદિતાસ્સૂર્યાઃ । પાપાન્નિર્ઘ્નન્તિ સર્વદા ।
રોદસ્યોન્તર્દેશેષુ । તત્ર ન્યસ્યન્તે વાસવૈઃ ।
તેઽશરીરાઃ પ્રપદ્યન્તે । યથાઽપુણ્યસ્ય કર્મણઃ ।
અપાણ્યપાદકેશાસઃ । તત્ર તેયોનિજા જનાઃ ।
મૃત્વા પુનર્મૃત્યુમાપદ્યન્તે । અદ્યમાનાસ્સ્વકર્મભિઃ ॥ ૩૧ ॥

આશાતિકાઃ ક્રિમય ઇવ । તતઃ પૂયન્તે વાસવૈઃ અપૈતં મૃત્યું જયતિ ।
ય એવં વેદ । સ ખલ્વૈવં વિદ્બ્રાહ્મણઃ । દીર્ઘશ્રુત્તમો ભવતિ ।
કશ્યપસ્યાતિથિસ્સિદ્ધગમનસ્સિદ્ધગમનઃ । તસ્યૈષા ભવતિ ।
આયસ્મિન્થ્સપ્ત વાસવાઃ । રોહન્તિ પૂર્વ્યા રુહઃ ॥ ૩૨ ॥

ઋષિર્ હ દીર્ઘશ્રુત્તમઃ । ઇન્દ્રસ્ય ઘર્મો અતિથિરિતિ ।
કશ્યપઃ પશ્યકો ભવતિ । યત્સર્વં પરિપશ્યતીતિ સૌક્ષ્મ્યાત્ ।
અથાગ્નેરષ્ટપુરુષસ્ય । તસ્યૈષા ભવતિ ।
અગ્ને નય સુપથા રાયે અસ્માન્ । વિશ્વાનિ દેવ વયુનાનિ વિદ્વાન્ ।
યુયોધ્યસ્મજ્જુહુરાણમેનઃ । ભૂયિષ્ઠન્તે નમ ઉક્તિં વિધેમેતિ ॥ ૩૩ ॥

અગ્નિશ્ચ જાતવેદાશ્ચ । સહોજા અજિરાપ્રભુઃ । વૈશ્વાનરો નર્યાપાશ્ચ ।
પઙ્ક્તિરાધાશ્ચ સપ્તમઃ વિસર્પેવાઽષ્ટમોઽગ્નીનામ્ ।
એતેઽષ્ટૌ વસવઃ ક્ષિતા ઇતિ । યથર્ત્વેવાગ્નેરર્ચિર્વર્ણવિશેષાઃ ।
નીલાર્ચિશ્ચ પીતકાર્ચિશ્ચેતિ । અથ વાયોરેકાદશપુરુષસ્યૈકાદશસ્ત્રીકસ્ય ।

પ્રભ્રાજમાના વ્યવદાતાઃ ॥ ૩૪ ॥

યાશ્ચ વાસુકિવૈદ્યુતાઃ । રજતાઃ પરુષાઃ શ્યામાઃ । કપિલા અતિલોહિતાઃ ।
ઊર્ધ્વા અવપતન્તાશ્ચ । વૈદ્યુત ઇત્યેકાદશ । નૈનં વૈદ્યુતો હિનસ્તિ ।
ય એવં વેદ । સ હોવાચ વ્યાસઃ પારાશર્યઃ ।
વિદ્યુદ્વધમેવાહં મૃત્યુમૈચ્છમિતિ । ન ત્વકામꣳ હન્તિ ॥ ૩૫ ॥

ય એવં વેદ । અથ ગન્ધર્વગણાઃ । સ્વાનભ્રાટ્ ।
અઙ્ઘારિર્બમ્ભારિઃ । હસ્તસ્સુહસ્તઃ । કૃશાનુર્વિશ્વાવસુઃ ।
મૂર્ધન્વાન્થ્સૂર્યવર્ચાઃ । કૃતિરિત્યેકાદશ ગન્ધર્વગણાઃ ।
દેવાશ્ચ મહાદેવાઃ । રશ્મયશ્ચ દેવા ગરગિરઃ ॥ ૩૬ ॥

નૈનં ગિરો હિનસ્તિ । ય એવં વેદ ।
ગૌરી મિમાય સલિલાનિ તક્ષતી । એકપદી દ્વિપદી સા ચતુષ્પદી ।
અષ્ટાપદી નવપદી બભૂવુષી । સહસ્રાક્ષરા પરમે વ્યોમન્નિતિ ।
વાચો વિશેષણમ્ । અથ નિગદવ્યાખ્યાતાઃ ।
તાનનુક્રમિષ્યામઃ । વરાહવસ્સ્વતપસઃ ॥ ૩૭ ॥

વિદ્યુન્મહસો ધૂપયઃ । શ્વાપયો ગૃહમેધાશ્ચેત્યેતે ।
યે ચેમેઽશિમિવિદ્વિષઃ । પર્જન્યાસ્સપ્ત પૃથિવીમભિવર્ષન્તિ ।
વૃષ્ટિભિરિતિ । એતયૈવ વિભક્તિવિપરીતાઃ । સપ્તભિર્વાતૈરુદીરિતાઃ ।
અમૂન્લોકાનભિવર્ષન્તિ । તેષામેષા ભવતિ । સમાનમેતદુદકમ્ ॥ ૩૮ ॥

ઉચ્ચૈત્યવચાહભિઃ । ભૂમિં પર્જન્યા જિન્વન્તિ । દિવં જિન્વન્ત્યગ્નય ઇતિ ।
યદક્ષરં ભૂતકૃતમ્ । વિશ્વે દેવા ઉપાસતે । મહર્ષિમસ્ય ગોપ્તારમ્ ।
જમદગ્નિમકુર્વત । જમદગ્નિરાપ્યાયતે ।
છન્દોભિશ્ચતુરુત્તરૈઃ । રાજ્ઞસ્સોમસ્ય તૃપ્તાસઃ ॥ ૩૯ ॥

બ્રહ્મણા વીર્યાવતા । શિવા નઃ પ્રદિશો દિશઃ ।
તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે ।
દૈવીસ્સ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ ।
શન્નો અસ્તુ દ્વિપદે । શં ચતુષ્પદે ।
સોમપા ( ૩ ) અસોમપા ( ૩ ) ઇતિ નિગદવ્યાખ્યાતાઃ ॥ ૪૦ ॥

સહસ્રવૃદિયં ભૂમિઃ । પરં વ્યોમ સહસ્રવૃત્ । અશ્વિના ભુજ્યૂનાસત્યા ।
વિશ્વસ્ય જગતસ્પતી । જાયા ભૂમિઃ પતિર્વ્યોમ । મિથુનન્તા અતુર્યથુઃ ।
પુત્રો બૃહસ્પતી રુદ્રઃ । સરમા ઇતિ સ્ત્રીપુમમ્ ।
શુક્ર,ન્ વામન્યદ્યજં વામન્યત્ । વિષુરૂપે અહની દ્યૌરિવ સ્થઃ ॥ ૪૧ ॥

વિશ્વા હિ માયા અવથઃ સ્વધાવન્તૌ ।
ભદ્રા વાં પૂષણાવિહરાતિરસ્તુ વાસાત્યૌ ચિત્રૌ જગતો નિધાનૌ ।
દ્યાવાભૂમી ચરથઃ સ ँ સખાયૌ । તાવશ્વિના રાસભાશ્વા હવં મે ।
શુભસ્પતી આગત ँ સૂર્યયા સહ । ત્યુગ્રોહ ભુજ્યુમશ્વિનોદમેઘે ।
રયિન્ન કશ્ચિન્મમૃવાં ( ૨ ) અવાહાઃ । તમૂહથુર્નૌભિરાત્મન્વતીભિઃ ।
અન્તરિક્ષપ્રુડ્ભિરપોદકાભિઃ ॥ ૪૨

તિસ્રઃ ક્ષપસ્ત્રિરહાતિવ્રજદ્ભિઃ । નાસત્યા ભુજ્યુમૂહથુઃ પતઙ્ગૈઃ ।
સમુદ્રસ્ય ધન્વન્નાર્દ્રસ્ય પારે । ત્રિભીરથૈશ્શતપદ્ભિઃ ષડશ્વૈઃ ।
સવિતારં વિતન્વન્તમ્ । અનુબધ્નાતિ શાંબરઃ । આપપૂર્ષંબરશ્ચૈવ ।
સવિતારેપસોઽભવત્ । ત્ય ँ સુતૃપ્તં વિદિત્વૈવ । બહુસોમ ગિરં વશી ॥ ૪૩ ॥

અન્વેતિ તુગ્રો વક્રિયાન્તમ્ । આયસૂયાન્ત્સોમતૃપ્સુષુ । સ સઙ્ગ્રામસ્તમોદ્યોઽત્યોતઃ ।
વાચો ગાઃ પિપાતિ તત્ । સ તદ્ગોભિસ્સ્તાઽત્યેત્યન્યે । રક્ષસાનન્વિતાશ્ચ યે ।
અન્વેતિ પરિવૃત્યાઽસ્તઃ । એવમેતૌસ્થો અશ્વિના ।
તે એતે દ્યુઃપૃથિવ્યોઃ । અહરહર્ગર્ભન્દધાથે ॥ ૪૪ ॥

તયોરેતૌ વત્સાવહોરાત્રે । પૃથિવ્યા અહઃ । દિવો રાત્રિઃ ।
તા અવિસૃષ્ટૌ । દમ્પતી એવ ભવતઃ । તયોરેતૌ વત્સૌ ।
અગ્નિશ્ચાદિત્યશ્ચ । રાત્રેર્વત્સઃ । શ્વેત આદિત્યઃ । અહોઽગ્નિઃ ॥ ૪૫ ॥

તામ્રો અરુણઃ । તા અવિસૃષ્ટૌ । દમ્પતી એવ ભવતઃ ।
તયોરેતૌ વત્સૌ । વૃત્રશ્ચ વૈદ્યુતશ્ચ । અગ્નેર્વૃત્રઃ । વૈદ્યુત આદિત્યસ્ય ।
તા અવિસૃષ્ટૌ । દમ્પતી એવ ભવતઃ । તયોરેતૌ વત્સૌ ॥ ૪૬ ॥

ઉષ્મા ચ નીહારશ્ચ । વૃત્રસ્યોષ્મા । વૈદ્યુતસ્ય નીહારઃ ।
તૌ તાવેવ પ્રતિપદ્યેતે । સેય ँ રાત્રી ગર્ભિણી પુત્રેણ સંવસતિ ।

તસ્યા વા એતદુલ્બણમ્ । યદ્રાત્રૌ રશ્મયઃ ।
યથા ગોર્ગર્ભિણ્યા ઉલ્બણમ્ । એવમેતસ્યા ઉલ્બણમ્ ।
પ્રજયિષ્ણુઃ પ્રજયા ચ પશુભિશ્ચ ભવતિ ।
ય એવં વેદ । એતમુદ્યન્તમપિયન્તં ચેતિ ।
આદિત્યઃ પુણ્યસ્ય વત્સઃ । અથ પવિત્રાઙ્ગિરસઃ ॥ ૪૭ ॥

પવિત્રવન્તઃ પરિવાજમાસતે । પિતૈષાં પ્રત્નો અભિરક્ષતિ વ્રતમ્ ।
મહસ્સમુદ્રં વરુણસ્તિરોદધે । ધીરા ઇચ્છેકુર્ધરુણેષ્વારભમ્ ।
પવિત્રં તે વિતતં બ્રહ્મણસ્પતે । પ્રભુર્ગાત્રાણિ પર્યેષિવિશ્વતઃ ।
અતપ્તતનૂર્ન તદામો અશ્નુતે । શ઼ૃતાસ ઇદ્વહન્તસ્તત્સમાશત ।
બ્રહ્મા દેવાનામ્ । અસતસ્સદ્યે તતક્ષુઃ ॥ ૪૮ ॥

ઋશયસ્સપ્તાત્રિશ્ચ યત્ । સર્વેઽત્રયો અગસ્ત્યશ્ચ ।
નક્ષત્રૈશ્શઙ્કૃતોઽવસન્ । અથ સવિતુઃ શ્યાવાશ્વસ્યાઽવર્તિકામસ્ય ।
અમી ય ઋક્ષા નિહિતાસ ઉચ્ચા । નક્તં દદૃશ્રે કુહાચિદ્દિવેયુઃ ।
અદબ્ધાનિ વરુણસ્ય વ્રતાનિ । વિચાકશચ્ચન્દ્રમા નક્ષત્રમેતિ ।
તત્સવિતુર્વરેણ્યં । ભર્ગો દેવસ્ય ધીમહિ ॥ ૪૯ ॥

ધિયો યો નઃ પ્રચોદયાત્ । તત્સવિતુર્વૃણીમહે ।
વયન્દેવસ્ય ભોજનમ્ । શ્રેષ્ઠꣳ સર્વધાતમમ્ ।
તુરં ભગસ્ય ધીમહિ । અપાગૂહત સવિતા તૃભીન્ ।
સર્વાદિવો અન્ધસઃ । નક્તન્તાન્યભવન્દૃશે ।
અસ્થ્યસ્થ્ના સંભવિષ્યામઃ । નામ નામૈવ નામ મે ॥ ૫૦ ॥

નપુꣳસકં પુમાꣳસ્ત્ર્યસ્મિ । સ્થાવરોઽસ્મ્યથ જઙ્ગમઃ ।
યજેઽયક્ષિ યષ્ટાહે ચ । મયા ભૂતાન્યયક્ષત ।
પશવો મમ ભૂતાનિ । અનૂબન્ધ્યોઽસ્મ્યહં વિભુઃ ।
સ્ત્રિયસ્સતીઃ । તા ઉમે પુꣳસ આહુઃ ।
પશ્યદક્ષણ્વાન્નવિચેતદન્ધઃ । કવિર્યઃ પુત્રસ્ય ઇમા ચિકેત ॥ ૫૧ ॥

યસ્તા વિજાનાત્સવિતુઃ પિતાસત્ । અન્ધો મણિમવિન્દત્ ।
તમનઙ્ગુલિરાવયત્ । અગ્રીવઃ પ્રત્યમુઞ્ચત્ ।

તમજિહ્વા અસશ્ચત । ઊર્ધ્વમૂલમવાક્છાખમ્ ।
વૃક્ષં યો વેદ સમ્પ્રતિ । ન સ જાતુ જનઃ શ્રદ્દધ્યાત્ ।
મૃત્યુર્મા મારયાદિતિઃ । હસિતꣳ રુદિતઙ્ગીતમ્ ॥ ૫૨ ॥
વીણાપણવલાસિતમ્ । મૃતઞ્જીવં ચ યત્કિંચિત્
અઙ્ગાનિ સ્નેવ વિદ્ધિ તત્ । અતૃષ્યꣳ સ્તૃષ્યધ્યાયત્ ।
અસ્માજ્જાતા મે મિથૂ ચરન્ન્ । પુત્રો નિરૃત્યા વૈદેહઃ ।
અચેતા યશ્ચ ચેતનઃ । સ તં મણિમવિન્દત્ ।
સોઽનઙ્ગુલિરાવયત્ । સોઽગ્રીવઃ પ્રત્યમુઞ્ચત્ ॥ ૫૩ ॥
સોઽજિહ્વો અસશ્ચત । નૈતમૃશિં વિદિત્વા નગરં પ્રવિશેત્ ।
યદિ પ્રવિશેત્ । મિથૌ ચરિત્વા પ્રવિશેત્ ।
તથ્સમ્ભવસ્યં વ્રતમ્ । આતમગ્ને રથન્તિષ્ઠ ।
એકાશ્વમેકયોજનમ્ । એકચક્રમેકધુરમ્ ।
વાતધ્રાજિગતિં વિભો । ન રિષ્યતિ ન વ્યથતે ॥ ૫૪ ॥
નાસ્યાક્ષો યાતુ સજ્જતિ । યચ્છ્વેતાન્રોહિતાꣳ શ્ચાગ્નેઃ ।
રથે યુક્ત્વાઽધિતિષ્ઠતિ । એકયા ચ દશભિશ્ચ સ્વભૂતે ।
દ્વાભ્યામિષ્ટયે વિꣳશત્યા ચ । તિસૃભિશ્ચ વહસે ત્રિꣳશતા ચ ।
નિયુદ્ભિર્વાયવિહિતા વિમુઞ્ચ ॥ ૫૫ ॥
આતનુષ્વ પ્રતનુષ્વ । ઉદ્ધમાઽઽધમ સન્ધમ ।
આદિત્યે ચન્દ્રવર્ણાનામ્ । ગર્ભમાધેહિ યઃ પુમાન્ ।
ઇતસ્સિક્તꣳ સૂર્યગતમ્ । ચન્દ્રમસે રસઙ્કૃધિ ।
વારાદઞ્જનયાગ્રેઽગ્નિમ્ । ય એકો રુદ્ર ઉચ્યતે ।
અસઙ્ખ્યાતાસ્સહસ્રાણિ । સ્મર્યતે ન ચ દૃશ્યતે ॥ ૫૬ ॥
એવમેતન્નિબોધત । આમન્દ્રૈરિન્દ્ર હરિભિઃ ।
યાહિ મયૂરરોમભિઃ । મા ત્વા કેચિન્નિયેમુરિન્ન પાશિનઃ ।
દધન્વેવ તા ઇહિ । મા મન્દ્રૈરિન્દ્ર હરિભિઃ ।
યામિ મયૂરરોમભિઃ । મા મા કેચિન્નિયેમુરિન્ન પાશિનઃ ।
નિધન્વેવ તાં ( ૨ ) ઇમિ । અણુભિશ્ચ મહદ્ભિશ્ચ ॥ ૫૭ ॥

નિઘૃષ્વૈરસમાયુતૈઃ । કાલૈર્હરિત્વમાપન્નૈઃ ।
ઇન્દ્રાયાહિ સહસ્રયુક્ । અગ્નિર્વિભ્રાષ્ટિવસનઃ ।
વાયુશ્વેતસિકદ્રુકઃ । સંવથ્સરો વિષૂવર્ણૈઃ ।
નિત્યસ્તેઽનુચરાસ્તવ । સુબ્રહ્મણ્યો૨ઁ સુબ્રહ્મણ્યો૨ઁ સુબ્રહ્મણ્યોમ્ ।
ઇન્દ્રાગચ્છ હરિવ આગચ્છ મેધાતિથેઃ । મેષ વૃષણશ્વસ્ય મેને ॥ ૫૮ ॥

ગૌરાવસ્કન્દિન્નહલ્યાયૈ જાર । કૌશિકબ્રહ્મણ ગૌતમબ્રુવાણ ।
અરુણાશ્વ ઇહાગતાઃ । વસવઃ પૃથિવિક્ષિતઃ ।
અષ્ટૌદિગ્વાસસોઽગ્નયઃ । અગ્નિશ્ચ જાતવેદાશ્ચેત્યેતે ।
તમ્રાશ્વાસ્તામ્રરથાઃ । તામ્રવર્ણાસ્તથાઽસિતાઃ ।
દણ્ડહસ્તાઃ ખ્યાદગ્દતઃ । ઇતો રુદ્રાઃ પરાઙ્ગતાઃ ॥ ૫૯ ॥

ઉક્ત૨ઁ સ્થાનં પ્રમાણઞ્ચ પુર ઇત । બૃહસ્પતિશ્ચ સવિતા ચ ।
વિશ્વરૂપૈરિહાગતામ્ । રથોનોદકવર્ત્મના ।
અપ્સુષા ઇતિ તદ્વયોઃ । ઉક્તો વેષો વાસા૨ઁસિ ચ ।
કાલાવયવાનામિતઃ પ્રતીજ્યા । વાસાત્યા ઇત્યશ્વિનોઃ ।
કોઽન્તરિક્ષે શ્બ્દકુરોતીતિ । વસિષ્ટો રૌહિણો મીમા૨ઁસાઞ્ચક્રે ।
તસ્યૈષા ભવતિ । વાશ્રેવ વિદ્યુદિતિ ।
બ્રહ્મણ ઉદરણમસિ । બ્રહ્ંઅણ ઉદીરણમસિ ।
બ્રહ્મણ આસ્તરણમસિ । બ્રહ્મણ ઉપસ્તરણમસિ ॥ ૬૦ ॥

[ અપક્રામત ગર્ભિણ્યઃ ]
અષ્ટયોનીમષ્ટપુત્રામ્ । અષ્ટપત્નીમિમાં મહીમ્ ।
અહં વેદ ન મે મૃત્યુઃ । નચામૃત્યુરઘાહરત્ ।
અષ્ટયોન્યષ્ટપુત્રમ્ । અષ્ટપદિદમન્તરિક્ષમ્ ।
અહં વેદ ન મે મૃત્યુઃ । નચામૃત્યુરઘાહરત્ ।
અષ્ટયોનીમષ્ટપુત્રામ્ । અષ્ટપત્નીમમૂન્દિવમ્ ॥ ૬૧ ॥

અહં વેદ ન મે મૃત્યુઃ । નચામૃત્યુરઘાહરત્ ।
સુત્રામાણં મહીમૂષુ । અદિતિર્દ્યૌર્દિતિરન્તરિક્ષમ્ ।
અદિતિર્માતા સ પિતા સ પુત્રઃ । વિશ્વે દેવા અદિતિઃ પઞ્ચજનાઃ ।

અદિતિર્જાતમદિતિજનિત્વમ્ । અષ્ટૌ પુત્રાસો અદિતેઃ ।
યે જાતાસ્તન્વઃ પરિ । દેવં ( ૨ ) ઉપપ્રૈત્સપ્તભિઃ ॥ ૬૨ ॥

પરા માર્તાણ્ડમાસ્યત્ । સપ્તભિઃ પુત્રૈરદિતિઃ ।
ઉપપ્રૈત્પૂર્વ્યં યુગમ્ । પ્રજાયૈ મૃત્યવે તત્ ।
પરા માર્તાણ્ડમાભરદિતિ । તાનનુક્રમિષ્યામઃ ।
મિત્રશ્ચ વરુણશ્ચ । ધાતા ચાર્યમા ચ ।
અꣳશશ્ચ ભગશ્ચ । ઇન્દ્રશ્ચ વિવસ્વાꣳશ્ચેત્યેતે ।
હિરણ્ય ગર્ભો હꣳસશ્શુચિષત્ ।
બ્રહ્મજજ્ઞાનં તદિત્પદમિતિ ગર્ભ પ્રાજાપત્યઃ ।
અથ પુરુષઃ સપ્ત પુરુષઃ ॥ ૬૩ ॥

[ યથાસ્થાનં ગર્ભિણ્યઃ ]
યોઽસૌ તપન્નુદેતિ । સ સર્વેષાં ભૂતાનાં પ્રાણાનાદાયોદેતિ ।
મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણાનાદાયોદગાઃ ।
અસૌ યોઽસ્તમેતિ । સ સર્વેષાં ભૂતાનાં પ્રાણાનાદાયાઽસ્તમેતિ ।
મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણાનાદાયાઽસ્તઙ્ગાઃ ।
અસૌ ય આપૂર્યતિ । સ સર્વેષાં ભૂતાનાં પ્રાણૈરાપૂર્યતિ ॥ ૬૪ ॥

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરાપૂરિષ્ઠાઃ ।
અસૌ યોઽપક્ષીયતિ । સ સર્વેષાં ભૂતાનાં પ્રાણૈરપક્ષીયતિ ।
મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપક્ષેષ્ઠાઃ ।
અમૂનિ નક્ષત્રાણિ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પન્તિ ચોત્સર્પન્તિ ચ ।
મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપત મોત્સૃપત ॥ ૬૫ ॥

ઇમે માસાશ્ચાર્ધમાસાશ્ચ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પન્તિ ચોત્સર્પન્તિ ચ ।
મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપત મોત્સૃપત ।
ઇમ ઋતવઃ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પન્તિ ચોત્સર્પન્તિ ચ ।
મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપત મોત્સૃપત ।
અયꣳ સંવત્સરઃ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પતિ ચોત્સર્પતિ ચ ॥ ૬૬ ॥

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપ મોત્સૃપ ।

ઇદમહઃ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પતિ ચોત્સર્પતિ ચ ।
મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપ મોત્સૃપ ।
ઇયꣳ રાત્રિઃ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પતિ ચોત્સર્પતિ ચ ।
મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપ મોત્સૃપ ।
ૐ ભૂર્ભુવસ્સ્વઃ । એતદ્વો મિથુનં મા નો મિથુનꣳ રીઢ્વમ્ ॥ ૬૭ ॥

અથાદિત્યસ્યાષ્ટપુરુષસ્ય ।
વસૂનામાદિત્યાનꣳ સ્થાને સ્વતેજસા ભાનિ ।
રુદ્રાણામાદિત્યાનꣳ સ્થાને સ્વતેજસા ભાનિ ।
આદિત્યાનામાદિત્યાનꣳ સ્થાને સ્વતેજસા ભાનિ ।
સતાꣳ સત્યાનામ્ । આદિત્યાનꣳ સ્થાને સ્વતેજસા ભાનિ ।
અભિધૂન્વતામભિઘ્નતામ્ । વાતવતાં મરુતામ્ ।
આદિત્યાનꣳ સ્થાને સ્વતેજસા ભાનિ ।
ઋભૂણામાદિત્યાનꣳ સ્થાને સ્વતેજસા ભાનિ ।
વિશ્વેષાન્દેવાનામ્ । આદિત્યાનꣳ સ્થાને સ્વતેજસા ભાનિ ।
સંવત્સરસ્ય સવિતુઃ । આદિત્યસ્ય સ્વતેજસા ભાનિ ।
ૐ ભૂર્ભુવસ્સ્વઃ । રશ્મયો વો મિથુનં મા નો મિથુનꣳ રીઢ્વમ્ ॥ ૬૮ ॥

આરોગસ્ય સ્થાને સ્વતેજસા ભાનિ । ભ્રાજસ્ય સ્થાને સ્વતેજસા ભાનિ ।
પટરસ્ય સ્થાને સ્વતેજસા ભાનિ । પતઙ્ગસ્ય સ્થાને સ્વતેજસા ભાનિ ।
સ્વર્ણરસ્ય સ્થાને સ્વતેજસા ભાનિ । જ્યોતિષીમતસ્ય સ્થાને સ્વતેજસા ભાનિ ।
વિભાસસ્ય સ્થાને સ્વતેજસા ભાનિ । કશ્યપસ્ય સ્થાને સ્વતેજસા ભાનિ ।
ૐ ભૂર્ભુવસ્સ્વઃ । આપો વો મિથુનં મા નો મિથુનꣳ રીઢ્વમ્ ॥ ૬૯ ॥

અથ વયોરેકાદશપુરુષસ્યૈકાદશસ્ત્રીકસ્ય ।
પ્રભ્રાજમાનાનાꣳ રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
વ્યવદાતાનાꣳ રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
વાસુકિવૈદ્યુતાનાꣳ રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
રજતાનાꣳ રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
પરુષાણાꣳ રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।

શ્યામાનાગ્ઁ રુદ્રાણાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
કપિલાનાગ્ઁ રુદ્રાણાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
અતિલોહિતાનાગ્ઁ રુદ્રાણાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
ઊર્ધ્વાનાગ્ઁ રુદ્રાણાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ॥ ૭૦ ॥

અવપતન્તાનાગ્ઁ રુદ્રાણાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
વૈદ્યુતાનાગ્ઁ રુદ્રાણાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
પ્રભ્રાજમાનીનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
વ્યવદાતીનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
વાસુકિવૈદ્યુતીનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
રજતાનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
પરુષાણાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
શ્યામાનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
કપિલાનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
અતિલોહિતીનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
ઊર્ધ્વાનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
અવપતન્તીનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
વૈદ્યુતીનાગ્ઁ રુદ્રાણીનાગ્ઁ સ્થાને સ્વતેજસા ભાનિ ।
ૐ ભૂર્ભુવસ્સ્વઃ । રૂપાણિ વો મિથુનં મા નો મિથુનગ્ઁ રીઢ્વમ્ ॥ ૭૧ ॥

અથાગ્નેરષ્ટપુરુષસ્ય ।
અગ્નેઃ પૂર્વદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
જાતવેદસ ઉપદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
સહોજસો દક્ષિણદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
અજિરાપ્રભવ ઉપદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
વૈશ્વાનરસ્યાઽપરદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
નર્યાપસ ઉપદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
પઙ્ક્તિરાધસૌદગ્દિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
વિસર્પિણ ઉપદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।

ૐ ભૂર્ભુવસ્સ્વઃ । રૂપાણિ વો મિથુનં મા નો મિથુનꣳ રીઢ્વમ્ ॥ ૭૨ ॥

દક્ષિણપૂર્વસ્યાન્દિશિ વિસર્પી નરકઃ । તસ્માન્નઃ પરિપાહિ ।

દક્ષિણાપરસ્યાં દિશ્યવિસર્પી નરકઃ । તસ્માન્નઃ પરિપાહિ ।

ઉત્તરપૂર્વસ્યાન્દિશિ વિષાદી નરકઃ । તસ્માન્નઃ પરિપાહિ ।

ઉત્તરપરસ્યાન્દિશ્યવિષાદી નરકઃ । તસ્માન્નઃ પરિપાહિ ।

આ યસ્મિન્ત્સપ્ત વાસવા ઇન્દ્રિયાણિ શતક્રતવિત્યેતે ॥ ૭૩ ॥

ઇન્દ્રઘોષા વો વસુભિઃ પુરસ્તાદુપદધતામ્ ।

મનોજવસો વઃ પિતૃભિર્દક્ષિણત ઉપદધતામ્ ।

પ્રચેતા વો રુદ્રૈઃ પશ્ચાદુપદધતામ્ ।

વિશ્વકર્મા વ આદિત્યરુત્તરત ઉપદધતામ્ ।

ત્વષ્ટા વો રૂપૈરુપરિષ્ટાદુપદધતામ્ ।

સંજ્ઞાનં વઃ પશ્ચાદિતિ । આદિત્યસ્સર્વોઽગ્નિઃ પૃથિવ્યામ્ ।

વાયુરન્તરિક્ષે । સૂર્યો દિવિ । ચન્દ્રમા દિક્ષુ ।

નક્ષત્રાણિ સ્વલોકે । એવા હ્યેવ । એવા હ્યગ્ને ।

એવા હિ વાયો । એવા હીન્દ્ર । એવા હિ પૂષન્ । એવા હિ દેવાઃ ॥ ૭૪ ॥

આપમાપામપસ્સર્વાઃ । અસ્માદસ્માદિતોઽમુતઃ

અગ્નિર્વાયુશ્ચ સૂર્યશ્ચ । સહ સઞ્ચસ્કરર્દ્ધિયા ।

વાય્વશ્વા રશ્મિપતયઃ । મરીચ્યાત્મનો અદ્રુહઃ ।

દેવીર્ભુવનસૂવરીઃ । પુત્રવત્વાય મે સુત ।

મહાનામ્નીર્મહામાનાઃ । મહસો મહસસ્સ્વઃ ॥ ૭૫ ॥

દેવીઃ પર્જન્યસૂવરીઃ । પુત્રવત્વાય મે સુત ।

અપાઽશ્ન્યુષ્ણિમપા રક્ષઃ । અપાઽઽશ્ન્યુષ્ણિમપારઘમ્ ।

અપાઘ્રામપચાઽવર્તિમ્ । અપદેવીરિતો હિત ।

વજ્રન્દેવીરજીતાꣳશ્ચ । ભુવનન્દેવસૂવરીઃ ।

આદિત્યાનદિતિન્દેવીમ્ । યોનિનોર્ધ્વમુદીષત ॥ ૭૬ ॥

ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳસસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
કેતવો અરુણાસશ્ચ । ઋષયો વાતરશનાઃ ।
પ્રતિષ્ઠાꣳ શતધા હિ । સમાહિતાસો સહસ્રધાયસમ્ ।
શિવા નશ્શન્તમા ભવન્તુ । દિવ્યા આપ ઓષધયઃ ।
સુમૃડીકા સરસ્વતિ । મા તે વ્યોમ સન્દૃશિ ॥ ૭૭ ॥
યોઽપાં પુષ્પં વેદ । પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ ।
ચન્દ્રમા વા અપાં પુષ્પમ્ । પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ ।
આયતનવાન્ ભવતિ । અગ્નિર્વા અપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યોઽગ્નેરાયતનં વેદ ॥ ૭૮ ॥
આયતનવાન્ ભવતિ । આપો વા અગ્નેરાયતનમ્ ।
આયતનવાન્ ભવતિ । ય એવં વેદ ।
યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ।
વાયુર્વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યો વાયોરાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૭૯ ॥
આપો વૈ વાયોરાયતનમ્ । આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ ।
આયતનવાન્ ભવતિ । અસૌ વૈ તપન્નપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યોઽમુષ્ય તપત આયતનં વેદ ।
આયતનવાન્ ભવતિ । આપો વા અમુષ્ય તપત આયતનમ્ ॥ ૮૦ ॥
આયતનવાન્ ભવતિ । ય એવં વેદ ।
યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ।
ચન્દ્રમા વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યશ્ચન્દ્રમસ આયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વૈ ચન્દ્રમસ આયતનમ્ । આયતનવાન્ ભવતિ ॥ ૮૧ ॥
ય એવં વેદ । યોઽપામાયતનં વેદ ।

આયતનવાન્ ભવતિ । નક્ષત્રાણિ વા અપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યો નક્ષત્રાણામાયતનં વેદ ।
આયતનવાન્ ભવતિ । આપો વૈ નક્ષત્રાણામાયતનમ્ ।
આયતનવાન્ ભવતિ । ય એવં વેદ ॥ ૮૨ ॥

યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ
પર્જન્યો વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યઃ પર્જન્યસ્યાયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વૈ પર્જન્યસ્યાઽઽયતનમ્ । આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ ॥ ૮૩ ॥

આયતનવાન્ ભવતિ । સંવત્સરો વા અપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યસ્સંવત્સરસ્યાયતનં વેદ ।
આયતનવાન્ ભવતિ । આપો વૈ સંવત્સરસ્યાયતનમ્ ।
આયતનવાન્ ભવતિ । ય એવં વેદ ।
યોઽપ્સુ નાવં પ્રતિષ્ઠિતાં વેદ । પ્રત્યેવ તિષ્ઠતિ ॥ ૮૪ ॥

ઇમે વૈ લોકા અપ્સુ પ્રતિષ્ઠિતાઃ । તદેષાઽભ્યનૂક્તા ।
અપાꣳ રસમુદયꣳ સન્ । સૂર્યે શુક્રꣳ સમાભૃતમ્ ।
અપાꣳ રસસ્ય યો રસઃ । તં વો ગૃહ્ણામ્યુત્તમમિતિ ।
ઇમે વૈ લોકા અપાꣳ રસઃ । તેઽમુષ્મિન્નાદિત્યે સમાભૃતાઃ ।
જાનુદઘ્નીમુત્તરવેદીઙ્ખાત્વા । અપાં પૂરયિત્વા ગુલ્ફદઘ્નમ્ ॥ ૮૫ ॥

પુષ્કરપર્ણૈઃ પુષ્કરદણ્ડૈઃ પુષ્કરૈશ્ચ સꣳસ્તીર્ય । તસ્મિન્વિહાયસે ।
અગ્નિં પ્રણીયોપસમાધાય । બ્રહ્મવાદિનો વદન્તિ ।
કસ્માત્પ્રણીતેઽયમગ્નિશ્ચીયતે । સાપ્રણીતેઽયમપ્સુ હ્યયઞ્ચીયતે ।
અસૌ ભુવનેપ્યનાહિતાગ્નિરેતાઃ । તમભિત એતા અબીષ્ટકા ઉપદધાતિ ।
અગ્નિહોત્રે દર્શપૂર્ણમાસયોઃ । પશુબન્ધે ચાતુર્માસ્યેષુ ॥ ૮૬ ॥

અથો આહુઃ । સર્વેષુ યજ્ઞક્રતુષ્વિતિ ।
એતદ્ધ સ્મ વા આહુશ્શણ્ડિલાઃ । કમગ્નિઞ્ચિનુતે ।
સત્રિયમગ્નિઞ્ચિન્વાનઃ । સંવત્સરં પ્રત્યક્ષેણ ।

કમગ્નિઞ્ચિનુતે । સાવિત્રમગ્નિઞ્ચિન્વાનઃ ।
અમુમાદિત્યં પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે ॥ ૮૭ ॥

નાચિકેતમગ્નિઞ્ચિન્વાનઃ ।
પ્રાણાન્પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે । ચાતુર્હોત્રિયમગ્નિઞ્ચિન્વાનઃ ।
બ્રહ્મ પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે । વૈશ્વસૃજમગ્નિઞ્ચિન્વાનઃ ।
શરીરં પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે । ઉપાનુવાક્યમાશુમગ્નિઞ્ચિન્વાનઃ ॥ ૮૮ ॥

ઇમાન્ લોકાન્પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે । ઇમમારુણકેતુકમગ્નિઞ્ચિન્વાનઃ ।
ય એવાસૌ । ઇતશ્ચાઽમુતશ્ચાઽવ્યતીપતી । તમિતિ ।
યોઽગ્નેર્મિથૂયા વેદ । મિથુનવાન્ભવતિ ।
આપો વા અગ્નેર્મિથૂયાઃ । મિથુનવાન્ભવતિ । ય એવં વેદ ॥ ૮૯ ॥

આપો વા ઇદમાસન્ત્સલિલમેવ । સ પ્રજાપતિરેકઃ પુષ્કરપર્ણે સમભવત્ ।
તસ્યાન્તર્મનસિ કામસ્સમવર્તત । ઇદꣳ સૃજેયમિતિ ।
તસ્માદ્યત્પુરુષો મનસાભિગચ્છતિ । તદ્વાચા વદતિ ।
તત્કર્મણા કરોતિ । તદેષાઽભ્યનૂક્તા ।
કામસ્તદગ્રે સમવર્તતાધિ । મનસો રેતઃ પ્રથમં યદાસીત્ ॥ ૯૦ ॥

સતો બન્ધુમસતિ નિરવિન્દન્ન્ । હૃદિ પ્રતીષ્યા કવયો મનીષેતિ ।
ઉપૈનન્તદુપનમતિ । યત્કામો ભવતિ । ય એવં વેદ ।
સ તપોઽતપ્યત । સ તપસ્તપ્ત્વા । શરીરમધૂનુત । તસ્ય યન્માꣳસમાસીત્ ।
તતોઽરુણાઃ કેતવો વાતરશના ઋષય ઉદતિષ્ઠન્ન્ ॥ ૯૧ ॥

યે નખાઃ । તે વૈખાનસાઃ । યે વાલાઃ । તે વાલખિલ્યાઃ ।
યો રસઃ । સોઽપામ્ । અન્તરતઃ કૂર્મં ભૂતꣳ સર્પન્તમ્ ।
તમબ્રવીત્ । મમ વૈત્વઙ્માꣳસા । સમભૂત્ ॥ ૯૨ ॥

નેત્યબ્રવીત્ । પૂર્વમેવાહમિહાસમિતિ ।
તત્પુરુષસ્ય પુરુષત્વમ્ । સ સહસ્રશીર્ષા પુરુષઃ ।
સહસ્રાક્ષસ્સહસ્રપાત્ । ભૂત્વોદતિષ્ઠત્ ।
તમબ્રવીત્ । ત્વં વૈ પૂર્વꣳ સમભૂઃ ।
ત્વમિદં પૂર્વઃ કુરુષ્વેતિ । સ ઇત આદાયાપઃ । ॥ ૯૩ ॥

અઞ્જલિના પુરસ્તાદુપાદધાત્ । એવાહ્યેવેતિ ।
તત આદિત્ય ઉદતિષ્ઠત્ । સા પ્રાચી દિક્ ।
અથાઽરુણઃ । કેતુર્દક્ષિણત ઉપાદધાત્ ।
એવાહ્યગ્ન ઇતિ । તતો વા અગ્નિરુદતિષ્ઠત્ ।
સા દક્ષિણા દિક્ । અથારુણઃ કેતુઃ પશ્ચાદુપદધાત્ ।
એવાહિ વાયો ઇતિ ॥ ૯૪ ॥

તતો વાયુરુદતિષ્ઠત્ । સા પ્રતીચી દિક્ ।
અથારુણઃ કેતુરુત્તરત ઉપાદધાત્ । એવાહીન્દ્રેતિ ।
તતો વા ઇન્દ્ર ઉદતિષ્ઠત્ । સોદીચી દિક્ ।
અથારુણઃ કેતુર્મધ્ય ઉપાદધાત્ । એવાહિ પૂષન્નિતિ ।
તતો વૈ પૂષોદતિષ્ઠત્ । સેયન્દિક્ ॥ ૯૫ ॥

અથારુણઃ કેતુરુપરિષ્ટાદુપાદધાત્ । એવાહિ દેવા હતિ ।
તતો દેવમનુષ્યાઃ પિતરઃ । ગન્ધર્વાપ્સરસશ્ચોદતિષ્ઠન્ ।
સોર્ધ્વા દિક્ । યા વિપ્રુષો વિપરાપતન્ ।
તાભ્યોઽસુરા રક્ષાꣳસિ પિશાચાશ્ચોદતિષ્ઠન્ । તસ્માત્તે પરાભવન્ ।
વિપ્રુડ્ભ્યો હિ તે સમભવન્ । તદેષાભ્યનૂક્તા ॥ ૯૬ ॥

આપો હ યદ્બૃહતીર્ગર્ભમાયન્ । દક્ષન્દધાના જનયન્તીસ્સ્વયંભુમ્ ।
તત ઇમેધ્યસૃજ્યન્ત સર્ગાઃ । અદ્ભ્યો વા ઇદꣳ સમભૂત્ ।
તસ્માદિદꣳ સર્વં બ્રહ્મ સ્વયંભ્વિતિ ।
તસ્માદિદꣳ સર્વꣳ શિથિલમિવાઽધ્રુવમિવાભવત્ ।
પ્રજાપતિર્વાવ તત્ । આત્મનાત્માનં વિધાય ।
તદેવાનુપ્રાવિશત્ । તદેષાભ્યનૂક્તા ॥ ૯૭ ॥

વિધાય લોકાન્ વિધાય ભૂતાનિ । વિધાય સર્વાઃ પ્રદિશો દિશશ્ચ ।
પ્રજાપતિઃ પ્રથમજા ઋતસ્ય । આત્મનાત્માનમભિ સંવિવેશેતિ ।
સર્વમેવેદમાપ્ત્વા । સર્વમવરુદ્ધ્ય ।
તદેવાનુપ્રવિશતિ । ય એવં વેદ ॥ ૯૮ ॥

ચતુષ્ટય્ય આપો ગૃહ્ણાતિ । ચત્વારિ વા અપાँ રૂપાણિ ।
મેઘો વિદ્યુત્ । સ્તનયિત્નુર્વૃષ્ટિઃ । તાન્યેવાવરુન્ધે ।
આતપતિ વર્ષ્યા ગૃહ્ણાતિ । તાઃ પુરસ્તાદુપદધાતિ ।
એતા વૈ બ્રહ્મવર્ચસ્યા આપઃ । મુખત એવ બ્રહ્મવર્ચસમવરુન્ધે ।
તસ્માન્મુખતો બ્રહ્મવર્ચસિતરઃ ॥ ૯૯ ॥

કૂપ્યા ગૃહ્ણાતિ । તા દક્ષિણત ઉપદધાતિ ।
એતા વૈ તેજસ્વિનીરાપઃ । તેજ એઽવાસ્ય દક્ષિણતો દધાતિ ।
તસ્માદ્દક્ષિણોઽર્ધસ્તેજસ્વિતરઃ । સ્થાવરા ગૃહ્ણાતિ ।
તાઃ પશ્ચાદુપદધાતિ । પ્રતિષ્ઠિતા વૈ સ્થાવરાઃ ।
પશ્ચાદેવ પ્રતિતિષ્ઠતિ । વહન્તીર્ગૃહ્ણાતિ ॥૧૦૦ ॥

તા ઉત્તરત ઉપદધાતિ ।
ઓજસા વા એતા વહન્તીરિવોદ્વતીરિવ આકૂજતીરિવ ધાવન્તીઃ ।
ઓજ એવાસ્યોત્તરતો દધાતિ । તસ્માદુત્તરોઽર્ધ ઓજસ્વિતરઃ ।
સંભાર્યા ગૃહ્ણાતિ । તા મધ્ય ઉપદધાતિ ।
ઇયં વૈ સંભાર્યાઃ । અસ્યામેવ પ્રતિતિષ્ઠતિ ।
પલ્વલ્યા ગૃહ્ણાતિ । તા ઉપરિષ્ટાદુપાદધાતિ ॥ ૧૦૧ ॥

અસૌ વૈ પલ્વયાઃ । અમુષ્યામેવ પ્રતિતિષ્ઠતિ ।
દિક્ષૂપદધાતિ । દિક્ષુ વા આપઃ ।
અન્નં વા આપઃ । અદ્ભ્યો વા અન્નઞ્જાયતે ।
યદેવદ્ભ્યોઽન્નઞ્જાયતે । તદવરુન્ધે ।
તં વા એતમરુણાઃ કેતવો વાતરશનાઋષયોઽચિન્વન્ ।
તસ્માદારુણકેતુકઃ ॥ ૧૦૨ ॥

તદેષાભ્યનૂક્તા । કેતવો અરુણાસશ્ચ ।
ઋષયો વાતરશનાઃ । પ્રતિષ્ઠાँ શતધાહિ ।
સમાહિતાસો સહસ્રધાયસમિતિ । શતશશ્ચૈવ સહસ્રશશ્ચ પ્રતિતિષ્ઠતિ ।
ય એતમગ્નિઞ્ચિનુતે ય ઉચૈનમેવં વેદ ॥ ૧૦૩ ॥

જાનુદઘ્નીમુત્તરવેદીઙ્ખાત્વા । અપાં પૂરયતિ ।

આપઁ સર્વત્વાય । પુષ્કરપર્ણઁ રુક્મં પુરુષમિત્યુપદધાતિ ।
તપો વૈ પુષ્કરપર્ણમ્ । સત્યઁ રુક્મઃ । અમૃતં પુરુષઃ ।
એતાવદ્વા વાસ્તિ । યાવદેતત્ । યાવદેવાસ્તિ ॥ ૧૦૪ ॥

તદવરુન્ધે । કૂર્મમુપદધાતિ ।
અપામેવ મેધમવરુન્ધે । અથો સ્વર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ।
આપમાપામપસ્સર્વાઃ । અસ્માદસ્માદિતોઽમુતઃ ।
અગ્નિર્વાયુશ્ચ સૂર્યશ્ચ । સહસઞ્ચસ્કરર્દ્ધિયા ઇતિ ।
વાય્વશ્વા રશ્મિપતયઃ । લોકં પૃણચ્છિદ્રં પૃણ ॥ ૧૦૫ ॥

યાસ્તિસ્રઃ પરમજાઃ । ઇન્દ્રઘોષા વો વસુભિરેવાહ્યેવેતિ ।
પઞ્ચચિતય ઉપદધાતિ । પાઙ્ક્તોઽગ્નિઃ ।
યાવનેવાગ્નિઃ । તઞ્ચિનુતે ।
લોકંપૃણયા દ્વિતીયામુપદધાતિ । પઞ્ચ પદા વૈ વિરાટ્ ।
તસ્યા વા ઇયં પાદઃ । અન્તરિક્ષં પાદઃ । દ્યૌઃ પાદઃ ।
દિશઃ પાદઃ । પરોરજાઃ પાદઃ । વિરાજ્યેવ પ્રતિતિષ્ઠતિ ।
ય એતમગ્નિઞ્ચિનુતે । ય ઉચૈનમેવં વેદ ॥ ૧૦૬ ॥

અગ્નિં પ્રણીયોપસમાધાય । તમભિત એતા અબીષ્ટકા ઉપદધાતિ ।
અગ્નિહોત્રે દર્શપૂર્ણમાસયોઃ । પશુબન્ધે ચાતુર્માસ્યેષુ ।
અથો આહુઃ । સર્વેષુ યજ્ઞક્રતુષ્વિતિ ।
અથ હસ્માહારુણસ્સ્વાયંભુવઃ । સાવિત્રઃ સર્વોઽગ્નિરિત્યનનુષઙ્ગં મન્યામહે ।
નાના વા એતેષાં વીર્યાણિ । કમગ્નિઞ્ચિનુતે ॥ ૧૦૭ ॥

સત્રિયમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
સાવિત્રમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
નાચિકેતમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
ચાતુર્હોત્રિયમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
વૈશ્વસૃજમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ॥ ૧૦૮
ઉપાનુવાક્યમાશુમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
ઇમમારુણકેતુકમગ્નિઞ્ચિવાન ઇતિ । વૃષા વા અગ્નિઃ ।

વૃષાણો સꣳ સ્ફાલયેત્ । હન્યેતાસ્ય યજ્ઞઃ ।
તસ્માન્નાનુષજ્યઃ । સોત્તરવેદિષુ ક્રતુષુ ચિન્વીત ।
ઉત્તરવેદ્યાꣳ હ્યગ્નિશ્ચીયતે । પ્રજાકામશ્ચિન્વીત ॥ ૧૦૯ ॥

પ્રાજાપત્યો વા એષોઽગ્નિઃ । પ્રાજાપત્યાઃ પ્રજાઃ ।
પ્રજાવાન્ ભવતિ । ય એવં વેદ ।
પશુકામશ્ચિન્વીત । સંજ્ઞાનં વા એતત્ પશૂનામ્ ।
યદાપઃ પશૂનામેવ સંજ્ઞાનેઽગ્નિઞ્ચિનુતે ।
પશુમાન્ ભવતિ । ય એવં વેદ ॥ ૧૧૦ ॥

વૃષ્ટિકામશ્ચિન્વીત । આપો વૈ વૃષ્ટિઃ ।
પર્જન્યો વર્ષુકો ભવતિ । ય એવં વેદ ।
આમયાવી ચિન્વીત । આપો વૈ ભેષજમ્ ।
ભેષજમેવાસ્મૈ કરોતિ । સર્વમાયુરેતિ ।
અભિચરꣳશ્ચિન્વીત । વજ્રો વૈ આપઃ ॥ ૧૧૧ ॥

વજ્રમેવ ભ્રાતૃવ્યેભ્યઃ પ્રહરતિ । સ્તૃણુત એનમ્ ।
તેજસ્કામો યશસ્કામઃ । બ્રહ્મવર્ચસકામસ્સ્વર્ગકામશ્ચિન્વીત ।
એતાવદ્વા વાસ્તિ । યાવદેતત્ ।
યાવદેવાસ્તિ । તદવરુન્ધે ।
તસ્યૈતદ્ વ્રતમ્ । વર્ષતિ ન ધાવેત્ ॥ ૧૧૨ ॥

અમૃતં વા આપઃ । અમૃતસ્યાનન્તરિત્યૈ ।
નાપ્સુ મૂત્રપુરીષઙ્કુર્યાત્ । ન નિષ્ઠીવેત્ ।
ન વિવસનસ્સ્નાયાત્ । ગુહ્યો વા એષોઽગ્નિઃ ।
એતસ્યાગ્નેરનતિદાહાય । ન પુષ્કરપર્ણાનિ હિરણ્યંવાઽધિતિષ્ઠેત્ ।
એતસ્યાગ્નેરનભ્યારોહાય । ન કૂર્મસ્યાશ્નીયાત્ ।
નોદકસ્યાઘાતુકાન્યેનમોદકાનિ ભવન્તિ । અઘાતુકા આપઃ ।
ય એતમગ્નિઞ્ચિનુતે । ય ઉચૈનમેવં વેદ ॥ ૧૧૩ ॥

ઇમાનુકં ભુવના સીષધેમ । ઇન્દ્રશ્ચ વિશ્વે ચ દેવાઃ ।
યજ્ઞશ્ચ નસ્તન્વઞ્ચ પ્રજાઞ્ચ । આદિત્યૈરિન્દ્રસ્સહ સીષધાતુ ।

આદિત્યૈરિન્દ્રસ્સગણો મરુદ્ભિઃ । અસ્માકં ભૂત્વવિતા તનૂનામ્ ।
આપ્લવસ્વ પ્રપ્લવસ્વ । આણ્ડીભવજ મા મુહુઃ ।
સુખાદીન્દુઃખનિધનામ્ । પ્રતિમુઞ્ચસ્વ સ્વાં પુરમ્ ॥ ૧૧૪ ॥

મરીચયસ્સ્વાયંભુવાઃ । યે શરીરાણ્યકલ્પયન્ ।
તે તે દેહઙ્કલ્પયન્તુ । મા ચ તે ખ્યાસ્મ તીરિષત્ ।
ઉત્તિષ્ઠત મા સ્વપ્ત । અગ્નિમિચ્છધ્વં ભારતાઃ ।
રાજ્ઞસ્સોમસ્ય તૃપ્તાસઃ । સૂર્યેણ સયુજોષસઃ ।
યુવા સુવાસાઃ । અષ્ટાચક્રા નવદ્વારા ॥ ૧૧૫ ॥

દેવાનાં પૂરયોધ્યા । તસ્યાꣳ હિરણ્મયઃ કોશઃ ।
સ્વર્ગો લોકો જ્યોતિષાઽઽવૃતઃ । યો વૈ તાં બ્રહ્મણો વેદ ।
અમૃતેનાઽઽવૃતાં પુરીમ્ । તસ્મૈ બ્રહ્મ ચ બ્રહ્મા ચ ।
આયુઃ કીર્તિં પ્રજાન્દદુઃ । વિભ્રાજમાનાꣳ હરિણીમ્ ।
યશસા સમ્પરીવૃતામ્ । પુરꣳ હિરણ્મયીં બ્રહ્મા ॥ ૧૧૬ ॥

વિવેશાઽપરાજિતા । પરાઙ્ગેત્યજ્યામયી ।
પરાઙ્ગેત્યનાશકી । ઇહચામુત્રચાન્વેતિ ।
વિદ્વાન્દેવાસુરાનુભયાન્ । યત્કુમારી મન્દ્રયતે ।
યદ્યોષદ્યત્પતિવ્રતા । અરિષ્ટં યત્કિંચ ક્રિયતે ।
અગ્નિસ્તદનુવેધતિ । અશꣳૃતાસશ્શꣳૃતાસશ્ચ ॥ ૧૧૭ ॥

યજ્વાનો યેઽપ્યયજ્વનઃ । સ્વર્યન્તો નાપેક્ષન્તે ।
ઇન્દ્રમગ્નિશ્ચ યે વિદુઃ । સિકતા ઇવ સંયન્તિ ।
રશ્મિભિસ્સમુદીરિતાઃ । અસ્માલ્લોકાદમુષ્માચ્ચ ।
ઋષિભિરદાત્પૃશ્નિભિ ।
અપેત વીત વિ ચ સર્પતાતઃ યેઽત્રસ્થ પુરાણા યે ચ નૂતનાઃ ।
અહોભિરદ્ભિરક્તુભિર્વ્યક્તમ્ ॥ ૧૧૮ ॥

યમો દદાત્વવસાનમસ્મૈ । નૃ મુણન્તુ નૃપાત્વર્યઃ ।
અકૃષ્ટા યે ચ કૃષ્ટજાઃ । કુમારીષુ કનીનીષુ ।
જારિણીષુ ચ યે હિતાઃ । રેતઃપીતા આણ્ડપીતાઃ ।

અઙ્ગારેષુ ચ યે હુતાઃ । ઉભયાન્ પુત્રપૌત્રકાન્ ।
યુવેઽહં યમરાજગાન્ । શતમિન્નુ શરદઃ ॥ ૧૧૯ ॥

અદો યદ્બ્રહ્મ વિલબમ્ । પિતૃણાઞ્ચ યમસ્ય ચ ।
વરુણસ્યાશ્વિનોરગ્નેઃ । મરુતાઞ્ચ વિહાયસામ્ ।
કામપ્રયવણં મે અસ્તુ । સ હ્યેવાસ્મિ સનાતનઃ ।
ઇતિ નાકો બ્રહ્મિશ્રવો રાયો ધનમ્ । પુત્રાનાપો દેવીરિહાઽઽહિત ॥ ૧૨૦ ॥

વિશીર્ષ્ણીઙ્ગૃધ્રશીર્ષ્ણીઞ્ચ । અપેતોનિરૃતિꣳ હથઃ ।
પરિબાધꣳ શ્વેતકુક્ષમ્ । નિજઙ્ઘꣳ શબલોદરમ્ ।
સ તાન્ વાચ્યાયયા સહ । અગ્ને નાશય સન્દૃશઃ ।
ઈર્ષ્યાસૂયે બુભુક્ષામ્ । મન્યું કૃત્યાં ચ દીધિરે ।
રથેન કિꣳશુકાવતા । અગ્ને નાશય સન્દૃશઃ ॥ ૧૨૧ ॥

પર્જન્યાય પ્રગાયત । દિવસ્પુત્રાય મીઢુષે ।
સ નો યવસમિચ્છતુ । ઇદં વચઃ પર્જન્યાય સ્વરાજે ।
હૃદો અસ્ત્વન્તરન્તદ્યુયોત । મયોભૂર્વાતો વિશ્વકૃષ્ટયસ્સન્ત્વસ્મે ।
સુપિપ્પલા ઓષધીર્દેવગોપાઃ । યો ગર્ભમોષધીનમ્ ।
ગવાઙ્કૃણોત્યર્વતામ્ । પર્જન્યઃ પુરુષીણામ્ ॥ ૧૨૨ ॥

પુનર્મામૈત્વિન્દ્રિયમ્ । પુનરાયુઃ પુનર્ભગઃ ।
પુનર્બ્રાહ્મણમૈતુ મા । પુનર્દ્રવિણમૈતુ મા ।
યન્મેઽદ્ય રેતઃ પૃથિવીમસ્કાન્ । યદોષધીરપ્યસરદ્યદાપઃ ।
ઇદન્તત્પુનરાદદે । દીર્ઘાયુત્વાય વર્ચસે ।
યન્મે રેતઃ પ્રસિચ્યતે । યન્મ આજાયતે પુનઃ ।
તેન મામમૃતં કુરુ । તેન સુપ્રજસઙ્કુરુ ॥ ૧૨૩ ॥

અદ્ભ્યસ્તિરોધાઽજાયત । તવ વૈશ્રવણસ્સદા ।
તિરોધેહિ સપત્નાન્નઃ । યે અપોઽશ્નન્તિ કેચન ।
ત્વાષ્ટ્રીં માયાં વૈશ્રવણઃ । રથꣳ સહસ્રવન્ધુરમ્ ।
પુરુશ્ચક્રꣳ સહસ્રાશ્વમ્ । આસ્થાયાયાહિ નો બલિમ્ ।
યસ્મૈ ભૂતાનિ બલિમાવહન્તિ । ધનઙ્ગાવો હસ્તિહિરણ્યમશ્વાન્ ॥ ૧૨૪ ॥

અસામ સુમતૌ યજ્ઞિયસ્ય । શ્રિયં બિભ્રતિઽન્નમુખીં વિરાજમ્ ।
સુદર્શને ચ ક્રૌઞ્ચે ચ । મૈનાગે ચ મહાગિરૌ ।
શતદ્વાટ્ટારગમન્તા । સ ँ હાર્યન્નગરં તવ ।
ઇતિ મન્ત્રાઃ । કલ્પોઽત ઊર્ધ્વમ્ । યદિ બલિ ँ હરેત્ ।
હિરણ્યનાભયે વિતુદયે કૌબેરાયાયં બલિઃ ॥ ૧૨૫ ॥
સર્વભૂતધિપતયે નમ ઇતિ । અથ બલિ ँ હૃત્વોપતિષ્ઠેત ।
ક્ષત્રં ક્ષત્રં વૈશ્રવણઃ । બ્રાહ્મણા વય ँ સ્મઃ ।
નમસ્તે અસ્તુ મા મા હિ ँ સીઃ । અસ્માત્પ્રવિશ્યાન્નમદ્ધીતિ ।
અથ તમગ્નિમાદધીત । યસ્મિન્નેતત્કર્મ પ્રયુઞ્જીત ।
તિરોધા ભૂઃ । તિરોધા ભુવઃ ॥ ૧૨૬ ॥
તિરોધાસ્સ્વઃ । તિરોધા ભૂર્ભુવસ્સ્વઃ ।
સર્વેષાં લોકાનામાધિપત્યે સીદેતિ । અથ તમગ્નિમિન્ધીત ।
યસ્મિન્નેતત્કર્મ પ્રયુઞ્જીત । તિરોધા ભૂસ્સ્વાહા ।
તિરોધા ભુવસ્સ્વાહા । તિરોધાસ્સ્વસ્સ્વાહા ।
તિરોધા ભૂર્ભુવસ્સ્વસ્સ્વાહા ।
યમિન્નસ્ય કાલે સર્વા આહુતીર્ હુતા ભવેયુઃ ॥ ૧૨૭ ॥
અપિ બ્રાહ્મણમુખીનાઃ । તસ્મિન્નહ્નઃ કાલે પ્રયુઞ્જીત ।
પરસ્સુપ્તજનાદ્વેપિ । માસ્મ પ્રમાદ્યન્તમાધ્યાપયેત્ ।
સર્વાર્થાસ્સિદ્ધ્યન્તે । ય એવં વેદ ।
ક્ષુધ્યન્નિદમજાનતામ્ । સર્વાર્થા ન સિદ્ધ્યન્તે ।
યસ્તે વિઘાતુકો ભ્રાતા । મમાન્તર્હૃદયે શ્રિતઃ ॥ ૧૨૮ ॥
તસ્મા ઇમમગ્રપિણ્ડઞ્જુહોમિ । સ મેઽર્થાન્મા વિવધીત્ ।
મયિ સ્વાહા । રાજાધિરાજાય પ્રસહ્યસાહિને ।
નમો વયં વૈશ્રવણાય કુર્મહે । સ મે કામાન્કામકામાય મહ્યમ્ ।
કામેશ્વરો વૈશ્રવણો દદાતુ । કુબેરાય વૈશ્રવણાય ।
મહારાજાય નમઃ । કેતવો અરુણાસશ્ચ ।

ઋષયો વાતરશનાઃ । પ્રતિષ્ઠાઁ શતધા હિ ।
સમાહિતાસો સહસ્રધાયસમ્ । શિવાનશ્શન્તમા ભવન્તુ ।
દિવ્યા આપ ઓષધયઃ । સુમૃડીકા સરસ્વતિ ।
મા તે વ્યોમ સન્દૃશિ ॥ ૧૨૯ ॥

સંવત્સરમેતદ્ વ્રતં ચરેત્ । દ્વૌ વા માસૌ ।
નિયમસ્સમાસેન । તસ્મિન્નિયમવિશેષાઃ ।
ત્રિષવણમુદકોપસ્પર્શી । ચતુર્થકાલપાનભક્તસ્સ્યાત્ ।
અહરહર્વા ભૈક્ષમશ્નીયાત્ । ઔદુંબરીભિસ્સમિદ્ભિરગ્નિં પરિચરેત્ ।
પુનર્માંમૈત્ત્વિન્દ્રિયનિત્યેતેનાઽનુવાકેન । ઉદ્ધૃતપરિપૂતાભિરદ્ભિઃ કાર્યં કુર્વીત ॥ ૧૩૦ ॥

અસઞ્ચયવાન્ । અગ્નયે વાયવે સૂર્યાય ।
બ્રહ્મણે પ્રજાપતયે । ચન્દ્રમસે નક્ષત્રેભ્યઃ ।
ઋતુભ્યસ્સંવત્સરાય । વરુણાયારુણાયેતિ વ્રતહોમાઃ ।
પ્રવર્ગ્યવદાદેશઃ । અરુણાઃ કાણ્ડઋષયઃ ।
અરણ્યેઽધીયીરન્ । ભદ્રઙ્કર્ણેભિરિતિ દ્વે જપિત્વા ॥ ૧૩૧ ॥

મહાનામ્નીભિરુદકઁ સઁસ્પર્શ્ય । તમાચાર્યો દદ્યાત્ ।
શિવાનશ્શન્તમેત્યોષધીરાલભતે । સુમૃડીકેતિ ભૂમિમ્ ।
એવમપવર્ગે । ધેનુર્દક્ષિણા । કઁસં વાસશ્ચ ક્ષૌમમ્ ।
અન્યદ્વા શુક્લમ્ । યથાશક્તિ વા । એવઁસ્વાધ્યાયધર્મેણ ।
અરણ્યેઽધીયીત । તપસ્વી પુણ્યો ભવતિ તપસ્વી પુણ્યો ભવતિ ॥ ૧૩૨ ॥

ૐ ભદ્રઙ્કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાઁસસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૧૩૩ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

This first prashna of the arAnyaka is known as aruNaprashnaH

From taittirIyasamhitAml

Note on the use of t or th in apashyamahametAnthsapta in

.. 0. 1. 7. 21.. . See top right

https://archive.org/details/taittiriya/taittiriya$_{a}ranyaka_{b}haskara_{0}1/page/n50/mode/1up$

It is explained in Taittiriya-pratisakhya

https://archive.org/details/in.ernet.dli.2015.553666/page/n161/mode/2up

See pages 88 and 89 .

There are two parts

Rule 1 (a and b)

a .

if ઙ્ followed by સ્ , ષ્ then ક્ is Agama

eg - પ્રત્યઙ્ સોમો => પ્રત્યઙ્+ક્+સોમો

eg - પ્રત્યઙ્ ષડહો => પ્રત્યઙ્ +ક્ +ષડહો

b .

if ટ્ , ન્ followed by સ્ , ષ્ ) then ત્ is Agama

eg - વિદ્વાન્ સોમેન => વિદ્વાન્ + ત્ +સોમેન

our eg એતાન્ સમ => એતાન્ + ત્ +સમ

વટ્ સ્વયમભિ => વટ્ + ત્ + સ્વયમભિ

Rule 2

First letter in group followed by ઊષ્મ - becomes second in the respective group

eg - પ્રત્યઙ્+ક્+સોમો => પ્રત્યઙ્+ ખ્ +સોમો

વિદ્વાન્ + ત્ +સોમેન => વિદ્વાન્ + થ્ +સોમેન

our eg એતાન્ + ત્ +સમ => એતાન્ + થ્ +સમ

See pratishakhya reference page 164

This is the reason many books also use saMvathsara

in place of saMvatsara etc .

BTW વર્ધન as વર્દ્ધન is also documented as દ્વિવર્ણમ્

page 162 onwards in the same pratishAkhya reference

(sutra 1 and 5 for વર્દ્ધન)

These specifics are emphasized in some vedic books to remind

ઉચ્ચારણ although some books are liberal and expect

students to learn from parampara .

- Muralidhara muraliba at gmail.com

Encoded with Accents by Rajagopal Iyer

॥ તૈત્તિરીયારણ્યકમ્ અરુણપ્રશ્નઃ ॥

સ્વરરહિતમ્
ૐ ભદ્રં કર્ણેભિઃ શ઼ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ ભદ્રં કર્ણેભિઃ શ઼ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
આપમાપામપઃ સર્વાઃ । અસ્માદસ્માદિતોઽમુતઃ ॥ ૧ ॥

અગ્નિર્વાયુશ્ચ સૂર્યશ્ચ । સહ સંચસ્કરર્દ્ધિયા ।
વાય્વશ્વા રશ્મિપતયઃ । મરીચ્યાત્મનો અદ્રુહઃ ।
દેવીર્ભુવનસૂવરીઃ । પુત્રવત્વાય મે સુત ।
મહાનામ્નીર્મહામાનાઃ । મહસો મહસસ્સ્વઃ ।
દેવીઃ પર્જન્યસૂવરીઃ । પુત્રવત્વાય મે સુત ॥ ૨ ॥

અપાશ્નુષ્ણિમપા રક્ષઃ । અપાશ્નુષ્ણિમપારઘમ્ ।
અપાઘ્રામપ ચાવર્તિમ્ । અપદેવીરિતો હિત ।
વજ્રં દેવીરજીતાꣳશ્ચ । ભુવનં દેવસૂવરીઃ ।
આદિત્યાનદિતિં દેવીમ્ । યોનિનોર્ધ્વમુદીષત ।
શિવાનશ્શન્તમા ભવન્તુ । દિવ્યા આપ ઓષધયઃ ।
સુમૃડીકા સરસ્વતી । મા તે વ્યોમ સંદૃશિ ॥ ૩ ॥

સ્મૃતિઃ પ્રત્યક્ષમૈતિહ્યમ્ । અનુમાનશ્ચતુષ્ટયમ્ ।
એતૈરાદિત્યમણ્ડલમ્ । સર્વૈરેવ વિધાસ્યતે ।
સૂર્યો મરીચિમાદત્તે । સર્વસ્માદ્ભુવનાદધિ ।

તસ્યાઃ પાકવિશેષેણ । સ્મૃતં કાલવિશેષણમ્ ।
નદીવ પ્રભવાત્કાચિત્ । અક્ષય્યાત્સ્યન્દતે યથા ॥ ૪ ॥

તાન્નદ્યોઽભિસમાયન્તિ । સોરુસ્સતી ન નિવર્તતે એવન્નાનાસમુત્થાનાઃ ।
કાલાસ્સંવત્સરꣳ શ્રિતાઃ । અણુશશ્ચ મહશશ્ચ ।
સર્વે સમવયન્ત્રિતમ્ । સતૈસ્સર્વૈસ્સમાવિષ્ટઃ ।
ઊરુસ્સન્ન નિવર્તતે અધિસંવત્સરં વિદ્યાત્ । તદેવ લક્ષણે ॥ ૫ ॥

અણુભિશ્ચ મહદ્ભિશ્ચ । સમારૂઢઃ પ્રદૃશ્યતે ।
સંવત્સરઃ પ્રત્યક્ષેણ । નાધિસત્વઃ પ્રદૃશ્યતે ।
પટરો વિક્લિધઃ પિઙ્ગઃ । એતદ્વરુણલક્ષણમ્ ।
યત્રૈતદુપદૃશ્યતે । સહસ્રં તત્ર નીયતે ।
એકꣳ હિ શિરો નાના મુખે । કૃત્સ્નમ્ તદૃતુલક્ષણમ્ ॥ ૬ ॥

ઉભયતસ્સપ્તેન્દ્રિયાણિ । જલ્પિતં ત્વેવ દિહ્યતે ।
શુક્લકૃષ્ણે સંવત્સરસ્ય । દક્ષિણવામયોઃ પાર્શ્વયોઃ ।
તસ્યૈષા ભવતિ । શુક્રં તે અન્યદ્યજતં તે અન્યત્ ।
વિષુરૂપે અહની દ્યૌરિવાસિ । વિશ્વા હિ માયા અવસિ સ્વધાવઃ ।
ભદ્રા તે પૂષન્નિહ રાતિરસ્ત્વિતિ । નાત્ર ભુવનમ્ । ન પૂષા ।
ન પશવઃ । નાદિત્યસ્સંવત્સર એવ પ્રયક્ષેણ પ્રિયતમં વિદ્યાત્ ।
એતદ્વૈ સંવત્સરસ્ય પ્રિયતમꣳ રૂપમ્ । યોઽસ્ય મહાનર્થ ઉત્પત્સ્યમાનો ભવતિ ।
ઇદં પુણ્યં કુરુષ્વેતિ । તમાહરણં દદ્યાત્ ॥ ૭ ॥

સાકંજાનાꣳ સપ્તથમાહુરેકજમ્ । ષડુદ્યમા ઋષયો દેવજા ઇતિ ।
તેષામિષ્ટાનિ વિહિતાનિ ધામશઃ । સ્થાત્રે રેજન્તે વિકૃતાનિ રૂપશઃ
કો નુ મર્યા અમિથિતઃ । સખા સખાયમબ્રવીત્ ।
જહાકો અસ્મ દીષતે । યસ્તિત્યાજ સખિવિદꣳ સખાયામ્ ।
ન તસ્ય વાચ્યપિ ભાગો અસ્તિ । યદીꣳ શ◌ૃણોત્યલકꣳ શ◌ૃણોતિ ॥ ૮ ॥

ન હિ પ્રવેદ સુકૃતસ્ય પન્થામિતિ । ઋતુરૃતુના નુદ્યમાનઃ ।
વિનનાદાભિધાવઃ । ષષ્ટિશ્ચ ત્રિꣳશકા વલ્ગાઃ ।
શુકકૃષ્ણૌ ચ ષષ્ટિકૌ । સારાગવસ્ત્રૈર્જરદક્ષઃ ।
વસન્તો વસુભિસ્સહ સંવત્સરસ્ય સવિતુઃ ।
પ્રૈષકૃત્પ્રથમઃ સ્મૃતઃ । અમૂનાદયતીત્યન્યાન્ ॥ ૯ ॥

અમૂꣳશ્ચ પરિરક્ષતઃ । એતા વાચઃ પ્રયુજ્યન્તે ।

યત્રૈતદુપદૃશ્યતે । એતદેવ વિજાનીયાત્ ।
પ્રમાણં કાલપર્યયે । વિશેષણં તુ વક્ષ્યામઃ ।
ઋતૂનાં તન્નિબોધત । શુક્લવાસા રુદ્રગણઃ ।
ગ્રીષ્મેણાઽઽવર્તતે સહ । નિજહન્ પૃથિવીઁ સર્વામ્ ॥ ૧૦ ॥

જ્યોતિષાઽપ્રતિખ્યેન સઃ । વિશ્વરૂપણિ વાસાઁ સિ ।
આદિત્યાનાં નિબોધત । સંવત્સરીણં કર્મફલમ્ ।
વર્ષાભિર્દદતાઁ સહ । અદુઃખો દુઃખચક્ષુરિવ ।
તદ્માઽઽપીત ઇવ દૃશ્યતે । શીતેનાવ્યથયન્નિવ ।
રુરુદક્ષ ઇવ દૃશ્યતે । હ્લાદયતે જ્વલતશ્ચૈવ ।
શામ્યતશ્ચાસ્ય ચક્ષુષી । યા વૈ પ્રજા ભ્રઁશ્યન્તે ।
સંવત્સરાત્તા ભ્રઁશ્યન્તે । યાઃ પ્રતિતિષ્ઠન્તિ ।
સંવત્સરે તાઃ પ્રતિતિષ્ઠન્તિ । વર્ષાભ્ય ઇત્યર્થઃ ॥ ૧૧ ॥

અક્ષિદુઃખોત્થિતસ્યૈવ । વિપ્રસન્ને કનીનિકે ।
આઙ્ક્તેચાદ્ગણં નાસ્તિ । ઋભૂણાં તન્નિબોધત ।
કનકાભાનિ વાસાઁ સિ । અહતાનિ નિબોધત ।
અન્નમશ્નીત મૃજ્મીત । અહં વો જીવનપ્રદઃ ।
એતા વાચઃ પ્રયુજ્યન્તે । શરદ્યત્રોપદૃશ્યતે ॥ ૧૨ ॥

અભિધૂન્વન્તોઽભિઘ્નન્ત ઇવ । વાતવન્તો મરુદ્ગણાઃ ।
અમુતો જેતુમિષુમુખામિવ । સન્નદ્ધાસ્સહ દદૃશે હ ।
અપધ્વસ્તૈર્વસ્તિવર્ણૈરિવ । વિશિખાસઃ કપર્દિનઃ ।
અક્રુદ્ધસ્ય યોત્સ્યમાનસ્ય । ક્રુદ્ધસ્યેવ લોહિની ।
હેમતશ્ચક્ષુષી વિદ્યાત્ । અક્ષ્ણયોઃ ક્ષિપણોરિવ ॥ ૧૩ ॥

દુર્ભિક્ષં દેવલોકેષુ । મનૂનામુદકં ગૃહે ।
એતા વાચઃ પ્રવદન્તીઃ । વૈદ્યુતો યાન્તિ શૈશિરીઃ ।
તા અગ્નિઃ પવમના અન્વૈક્ષત । ઇહ જીવિકામપરિપશ્યન્ ।
તસ્યૈષા ભવતિ । ઇહેહવસ્સ્વતપસઃ ।
મરુતસ્સૂર્યત્વચઃ । શર્મ સપ્રથા આવૃણે ॥ ૧૪ ॥

અતિતામ્રાણિ વાસાઁ સિ । અષ્ટિવજ્રિશતઘ્નિ ચ ।
વિશ્વે દેવા વિપ્રહરન્તિ । અગ્નિજિહ્વા અસશ્ચત ।
નૈવ દેવો ન મર્ત્યઃ । ન રાજા વરુણો વિભુઃ ।

નાગ્નિર્નેન્દ્રો ન પવમાનઃ । માતૃક્કચ્ચન વિદ્યતે ।
દિવ્યસ્યૈકા ધનુરાર્ત્નિઃ । પૃથિવ્યામપરા શ્રિતા ॥ ૧૫ ॥

તસ્યેન્દ્રો વમ્રિરૂપેણ । ધનુર્જ્યામછિનથ્સ્વયમ્ ।
તદિન્દ્રધનુરિત્યજ્યમ્ । અભ્રવર્ણેષુ ચક્ષતે ।
એતદેવ શંયોર્બાર્હસ્પત્યસ્ય । એતદ્રુદ્રસ્ય ધનુઃ ।
રુદ્રસ્ય ત્વેવ ધનુરાર્ત્નિઃ । શિર ઉત્પિપેષ ।
સ પ્રવર્ગ્યોઽભવત્ । તસ્માદ્યસ્સપ્રવર્ગ્યેણ યજ્ઞેન યજતે ।
રુદ્રસ્ય સ શિરઃ પ્રતિદધાતિ । નૈનꣳ રુદ્ર આરુકો ભવતિ । ય એવં વેદ ॥ ૧૬ ॥

અત્યૂર્ધ્વાક્ષોઽતિરશ્ચાત્ । શિશિરઃ પ્રદૃશ્યતે ।
નૈવ રૂપં ન વાસાꣳસિ । ન ચક્ષુઃ પ્રતિદૃશ્યતે ।
અન્યોન્યં તુ ન હિꣳસ્રાતઃ । સતસ્તદ્દેવલક્ષણમ્ ।
લોહિતોઽક્ષ્ણિ શારશીર્ષ્ણિઃ । સૂર્યસ્યોદયનં પ્રતિ ।
ત્વં કરોષિન્યઞ્જલિકામ્ । ત્વં કરોષિ નિજાનુકામ્ ॥ ૧૭ ॥

નિજાનુકામેન્યઞ્જલિકા । અમી વાચમુપાસતામિતિ ।
તસ્મૈ સર્વ ઋતવો નમન્તે । મર્યાદાકરત્વાત્પ્રપુરોધામ્ ।
બ્રાહ્મણ આપ્નોતિ । ય એવં વેદ । સ ખલુ સંવત્સર એતૈસ્સેનાનીભિસ્સહ ।
ઇન્દ્રાય સર્વાન્કામાનભિવહતિ । સ દ્રપ્સઃ । તસ્યૈષા ભવતિ ॥ ૧૮ ॥

અવદ્રપ્સો અꣳશુમતીમતિષ્ઠત્ । ઇયાનઃ કૃષ્ણો દશભિસ્સહસ્રૈઃ ।
આવર્તમિન્દ્રઃ શચ્યા ધમન્તમ્ । ઉપ્સ્નુહિ તં નૃમણામથદ્રામિતી ।
એતયૈવેન્દ્રઃ સલાવૃક્યા સહ । અસુરાન્ પરિવૃશ્ચતિ ।
પૃથિવ્યꣳશુમતી । તામન્વવસ્થિતઃ સંવત્સરો દિવં ચ ।
નૈવં વિદુષાઽઽચાર્યાન્તેવાસિનૌ । અન્યોન્યસ્મૈ દ્રુહ્યાતામ્ । યો દ્રુહ્યતિ ।
ભ્રશ્યતે સ્વર્ગાલ્લોકાત્ । ઇત્યૃતુમણ્ડલાનિ ।
સૂર્યમણ્ડલાન્યાખ્યાયિકાઃ । અત ઊર્ધ્વꣳ સનિર્વચનાઃ ॥૧૯ ॥

આરોગો ભ્રાજઃ પટરઃ પતઙ્ગઃ । સ્વર્ણરો જ્યોતિષિમાન્ વિભાસઃ ।
તે અસ્મૈ સર્વે દિવમાતપન્તિ । ઊર્જં દુહાના અનપસ્ફુરન્ત ઇતિ ।
કશ્યપોઽષ્ટમઃ । સ મહામેરું ન જહાતિ ।
તસ્યૈષા ભવતિ । યત્તે શિલ્પંકશ્યપ રોચનાવત્ ।
ઇન્દ્રિયાવત્પુષ્કલં ચિત્રભાનુ । યસ્મિન્ત્સૂર્યા અર્પિતાસ્સપ્ત સાકમ્ ॥ ૨૦ ॥

તસ્મિન્ રાજાનમધિવિશ્રયેમમિતિ । તે અસ્મૈ સર્વે કશ્યપાજ્જ્યોતિર્લભન્તે ।

તાન્ત્સોમઃ કશ્યપાદધિનિર્દ્ધમતિ । ભ્રસ્તાકર્મકૃદિવૈવમ્ ।
પ્રાણો જીવાનીન્દ્રિયજીવાનિ । સપ્ત શીર્ષણ્યાઃ પ્રાણાઃ ।
સૂર્યા ઇત્યાચાર્યાઃ । અપશ્યમહમેતાન્ત્સપ્ત સૂર્યાનિતિ ।
પઞ્ચકર્ણો વાત્સ્યાયનઃ । સપ્તકર્ણશ્ચ પ્લાક્ષિઃ ॥ ૨૧ ॥

See a note in the end on adding t before sapta for apashyamahametAntsapta
આનુશ્રાવિક એવ નૌ કશ્યપ ઇતિ । ઉભૌ વેદયિતે ।
ન હિ શેકુમિવ મહામેરું  ગન્તુમ્ । અપશ્યમહમેત્સૂર્યમણ્ડલં પરિવર્તમાનમ્ ।
ગાર્ગ્યઃ પ્રાણત્રાતઃ । ગચ્છન્ત મહામેરુમ્ । એકં ચાજહતમ્ ।
ભ્રાજપટરપતઙ્ગા નિહને । તિષ્ઠન્નાતપન્તિ । તસ્માદિહ તપ્ત્રિતપાઃ ॥ ૨૨ ॥

અમુત્રેતરે । તસ્માદિહાતપ્ત્રિતપાઃ । તેષામેષા ભવતિ ।
સપ્ત સૂર્યા દિવમનુપ્રવિષ્ટાઃ । તાનન્વેતિ પથિભિર્દક્ષિણાવાન્ ।
તે અસ્મૈ સર્વે ઘૃતમાતપન્તિ । ઊર્જં દુહાના અનપસ્ફુરન્ત ઇતિ ।
સપ્તર્ત્વિજસ્સૂર્યા ઇત્યાચાર્યાઃ ।  તેષામેષા ભવતિ । સપ્ત દિશો નાનાસૂર્યાઃ ॥ ૨૩ ॥

સપ્ત હોતાર ઋત્વિજઃ । દેવા આદિત્યા યે સપ્ત ।
તેભિસ્સોમાભીરક્ષણ ઇતિ । તદપ્યામ્નાયઃ ।
દિગ્ભ્રાજ ઋતૂન્ કરોતિ । એતયૈવાવૃતા સહસ્રસૂર્યતાયા ઇતિ વૈશંપાયનઃ ।
તસ્યૈષા ભવતિ । યદ્દ્યાવ ઇન્દ્ર તે શતꣳ શતં ભૂમીઃ ।
ઉતસ્યુઃ । નત્વા વજ્જિન્ સહસ્રꣳ સૂર્યાઃ ॥ ૨૪ ॥

અનુનજાતમષ્ટ રોદસી ઇતિ । નાનાલિઙ્ગત્વાદૃતૂનાં નાનાસૂર્યત્વમ્ ।
અષ્ટૌ તુ વ્યવસિતા ઇતિ । સૂર્યમણ્ડલાન્યષ્ટાત ઊર્ધ્વમ્ ।
તેષામેષા ભવતિ । ચિત્રં દેવાનામુદગાદનીકમ્ ।
ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્નેઃ । આપ્રા દ્યાવાપૃથિવી અન્તરિક્ષમ્ ।
સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચેતિ ॥ ૨૫ ॥

ક્વેદમભ્રન્નિવિશતે । ક્વાયꣳ સંવત્સરો મિથઃ ।
ક્વાહઃ ક્વેયન્દેવ રાત્રી । ક્વ માસા ઋતવઃ શ્રિતાઃ ।
અર્દ્ધમાસા મુહૂર્તાઃ । નિમેષાસ્તુટિભિસ્સહ ।
ક્વેમા આપો નિવિશન્તે । યદીતો યાન્તિ સમ્પ્રતિ ।
કાલા અપ્સુનિવિશન્તે । આપસ્સૂર્યે સમાહિતાઃ ॥ ૨૬ ॥

અભ્રાણ્યપઃ પ્રપદ્યન્તે । વિદ્યુત્સૂર્યે સમાહિતા ।
અનવર્ણે ઇમે ભૂમી । ઇયં ચાડસૌ ચ રોદસિ ।

કિꣳ સ્વિદત્રાન્તરા ભૂતમ્ । યેનેમે વિધૃતે ઉભે ।
વિષ્ણુના વિધૃતે ભૂમી । ઇતિ વત્સસ્ય વેદના ।
ઇરાવતી ધેનુમતી હિ ભૂતમ્ । સૂયવસિની મનુષે દશસ્યે ॥ ૨૭ ॥

વ્યષ્ટભ્નાદ્રોદસી વિષ્ણવેતે । દાધર્થ પૃથિવીમભિતો મયૂખૈઃ ।
કિન્તદ્વિષ્ણોર્બલમાહુઃ । કા દીપ્તિઃ કિં પરાયણમ્ ।
એકો યદ્ધારયદ્દેવઃ । રેજતી રોદસી ઉભે ।
વાતાદ્વિષ્ણોર્બલમાહુઃ । અક્ષરાદ્દીપ્તિરુચ્યતે ।
ત્રિપદાદ્ધારયદ્દેવઃ । યદ્વિષ્ણોરેકમુત્તમમ્ ॥ ૨૮ ॥

અગ્નયો વાયવશ્ચૈવ । એતદસ્ય પરાયણમ્ ।
પૃચ્છામિ ત્વા પરં મૃત્યુમ્ । અવમં મધ્યમઞ્ચતુમ્ ।
લોકઞ્ચ પુણ્યપાપાનામ્ । એતત્પૃચ્છામિ સમ્પ્રતિ ।
અમુમાહુઃ પરં મૃત્યુમ્ । પવમાનં તુ મધ્યમમ્ ।
અગ્નિરેવાવમો મૃત્યુઃ । ચન્દ્રમાશ્ચતુરુચ્યતે ॥ ૨૯ ॥

અનાભોગાઃ પરં મૃત્યુમ્ । પાપાસ્સંયન્તિ સર્વદા ।
આભોગાસ્ત્વેવ સંયન્તિ । યત્ર પુણ્યકૃતો જનાઃ ।
તતો મધ્યમમાયન્તિ । ચતુમગ્નિં ચ સમ્પ્રતિ ।
પૃચ્છામિ ત્વા પાપકૃતઃ । યત્ર યાતયતે યમઃ ।
ત્વન્નસ્તદ્બ્રહ્મન્ પ્રબ્રૂહિ । યદિ વેત્થાઽસતો ગૃહન્ ॥ ૩૦ ॥

કશ્યપાદુદિતાસ્સૂર્યાઃ । પાપાન્નિર્ઘ્નન્તિ સર્વદા ।
રોદસ્યોન્તર્દેશેષુ । તત્ર ન્યસ્યન્તે વાસવૈઃ ।
તેઽશરીરાઃ પ્રપદ્યન્તે । યથાઽપુણ્યસ્ય કર્મણઃ ।
અપાણ્યપાદકેશાસઃ । તત્ર તેયોનિજા જનાઃ ।
મૃત્વા પુનર્મૃત્યુમાપદ્યન્તે । અદ્યમાનાસ્સ્વકર્મભિઃ ॥ ૩૧ ॥

આશાતિકાઃ ક્રિમય ઇવ । તતઃ પૂયન્તે વાસવૈઃ અપૈતં મૃત્યું જયતિ ।
ય એવં વેદ । સ ખલ્વૈવં વિદ્બ્રાહ્મણઃ । દીર્ઘશ્રુત્તમો ભવતિ ।
કશ્યપસ્યાતિથિસ્સિદ્ધગમનસ્સિદ્ધગમનઃ । તસ્યૈષા ભવતિ ।
આયસ્મિન્થ્સપ્ત વાસવાઃ । રોહન્તિ પૂર્વ્યા રુહઃ ॥ ૩૨ ॥

ઋષિર્ હ દીર્ઘશ્રુત્તમઃ । ઇન્દ્રસ્ય ઘર્મો અતિથિરિતિ ।
કશ્યપઃ પશ્યકો ભવતિ । યત્સર્વં પરિપશ્યતીતિ સૌક્ષ્મ્યાત્ ।
અથાગ્નેરષ્ટપુરુષસ્ય । તસ્યૈષા ભવતિ ।

અગ્ને નય સુપથા રાયે અસ્માન્ । વિશ્વાનિ દેવ વયુનાનિ વિદ્વાન્ ।
યુયોધ્યસ્મજ્જુહુરાણમેનઃ । ભૂયિષ્ઠન્તે નમ ઉક્તિં વિધેમેતિ ॥ ૩૩ ॥

અગ્નિશ્ચ જાતવેદાશ્ચ । સહોજા અજિરાપ્રભુઃ । વૈશ્વાનરો નર્યાપાશ્ચ ।
પઙ્ક્તિરાધાશ્ચ સપ્તમઃ વિસર્પેવાઽષ્ટમોઽગ્નીનામ્ ।
એતેઽષ્ટૌ વસવઃ ક્ષિતા ઇતિ । યથર્ત્વેવાગ્નેરર્ચિર્વર્ણવિશેષાઃ ।
નીલાર્ચિશ્ચ પીતકાર્ચિશ્ચેતિ । અથ વાયોરેકાદશપુરુષસ્યૈકાદશસ્ત્રીકસ્ય ।
પ્રભ્રાજમાના વ્યવદાતાઃ ॥ ૩૪ ॥

યાશ્ચ વાસુકિવૈદ્યુતાઃ । રજતાઃ પરુષાઃ શ્યામાઃ । કપિલા અતિલોહિતાઃ ।
ઊર્ધ્વા અવપતન્તાશ્ચ । વૈદ્યુત ઇત્યેકાદશ । નૈનં વૈદ્યુતો હિનસ્તિ ।
ય એવં વેદ । સ હોવાચ વ્યાસઃ પારાશર્યઃ ।
વિદ્યુદ્વધમેવાહં મૃત્યુમૈચ્છમિતિ । ન ત્વકામꣳ હન્તિ ॥ ૩૫ ॥

ય એવં વેદ । અથ ગન્ધર્વગણાઃ । સ્વાનભ્રાટ્ ।
અઙ્ઘારિર્બમ્ભારિઃ । હસ્તસ્સુહસ્તઃ । કૃશાનુર્વિશ્વાવસુઃ ।
મૂર્ધન્વાન્થ્સૂર્યવર્ચાઃ । કૃતિરિત્યેકાદશ ગન્ધર્વગણાઃ ।
દેવાશ્ચ મહાદેવાઃ । રશ્મયશ્ચ દેવા ગરગિરઃ ॥૩૬ ॥

નૈનં ગિરો હિનસ્તિ । ય એવં વેદ ।
ગૌરી મિમાય સલિલાનિ તક્ષતી । એકપદી દ્વિપદી સા ચતુષ્પદી ।
અષ્ટાપદી નવપદી બભૂવુષી । સહસ્રાક્ષરા પરમે વ્યોમન્નિતિ ।
વાચો વિશેષણમ્ । અથ નિગદવ્યાખ્યાતાઃ ।
તાનનુક્રમિષ્યામઃ । વરાહવસ્સ્વતપસઃ ॥ ૩૭ ॥

વિદ્યુન્મહસો ધૂપયઃ । શ્વાપયો ગૃહમેધાશ્ચેત્યેતે ।
યે ચેમેઽશિમિવિદ્વિષઃ । પર્જન્યાસ્સપ્ત પૃથિવીમભિવર્ષન્તિ ।
વૃષ્ટિભિરિતિ । એતયૈવ વિભક્તિવિપરીતાઃ । સપ્તભિર્વાં તૈરુદીરિતાઃ ।
અમૂન્લોકાનભિવર્ષન્તિ । તેશામેષા ભવતિ । સમાનમેતદુદકમ્ ॥ ૩૮ ॥

ઉચ્ચૈત્યવચાહભિઃ । ભૂમિં પર્જન્યા જિન્વન્તિ । દિવં જિન્વન્ત્યગ્નય ઇતિ ।
યદક્ષરં ભૂતકૃતમ્ । વિશ્વે દેવા ઉપાસતે । મહર્ષિમસ્ય ગોપ્તારમ્ ।
જમદગ્નિમકુર્વત । જમદગ્નિરાપ્યાયતે ।
છન્દોભિશ્ચતુરુત્તરૈઃ । રાજ્ઞસ્સોમસ્ય તૃપ્તાસઃ ॥ ૩૯ ॥

બ્રહ્મણા વીર્યાવતા । શિવા નઃ પ્રદિશો દિશઃ ।
તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે ।

દૈવીસ્સ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ ।
શન્નો અસ્તુ દ્વિપદે । શં ચતુષ્પદે ।
સોમપા ( ૩ ) અસોમપા ( ૩ ) ઇતિ નિગદવ્યાખ્યાતાઃ ॥ ૪૦ ॥

સહસ્રવૃદિયં ભૂમિઃ । પરં વ્યોમ સહસ્રવૃત્ । અશ્વિના ભુજ્યૂનાસત્યા ।
વિશ્વસ્ય જગતસ્પતી । જાયા ભૂમિઃ પતિર્વ્યોમ । મિથુનન્તા અતુર્યથુઃ ।
પુત્રો બૃહસ્પતી રુદ્રઃ । સરમા ઇતિ સ્ત્રીપુમમ્ ।
શુક્ર,ન્ વામન્યદ્યજં વામન્યત્ । વિષુરૂપે અહની દ્યૌરિવ સ્થઃ ॥ ૪૧ ॥

વિશ્વા હિ માયા અવથઃ સ્વધાવન્તૌ ।
ભદ્રા વાં પૂષણાવિહરાતિરસ્તુ વાસાત્યૌ ચિત્રૌ જગતો નિધાનૌ ।
દ્યાવાભૂમી ચરથઃ સꣳ સખાયૌ । તાવશ્વિના રાસભાશ્વા હવં મે ।
શુભસ્પતી આગતꣳ સૂર્યયા સહ । ત્યુગ્રોહ ભુજ્યુમશ્વિનોદમેધે ।
રયિન્ન કશ્ચિન્મમૃવાં ( ૨ ) અવાહાઃ । તમૂહથુર્નૌભિરાત્મન્વતીભિઃ ।
અન્તરિક્ષપ્રુડ્ભિરપોદકાભિઃ ॥ ૪૨
તિસ્રઃ ક્ષપસ્ત્રિરહાતિવ્રજદ્ભિઃ । નાસત્યા ભુજ્યુમૂહથુઃ પતઙ્ગૈઃ ।
સમુદ્રસ્ય ધન્વન્નાર્દ્રસ્ય પારે । ત્રિભીરથૈશ્શતપદ્ભિઃ ષડશ્વૈઃ ।
સવિતારં વિતન્વન્તમ્ । અનુબધ્નાતિ શાંબરઃ । આપપૂર્ષંબરશ્ચૈવ ।
સવિતારેપસોઽભવત્ । ત્યꣳ સુતૃપ્તં વિદિત્વૈવ । બહુસોમ ગિરં વશી ॥ ૪૩ ॥

અન્વેતિ તુગ્રો વક્રિયાન્તમ્ । આયસૂયાન્ત્સોમતૃપ્સુષુ । સ સઙ્ગ્રામસ્તમોદ્યોઽત્યોતઃ ।
વાચો ગાઃ પિપાતિ તત્ । સ તદ્ગોભિસ્સ્તાઽત્યેત્યન્યે । રક્ષસાનન્વિતાશ્ચ યે ।
અન્વેતિ પરિવૃત્યાઽસ્તઃ । એવમેતૌસ્થો અશ્વિના ।
તે એતે દ્યુઃપૃથિવ્યોઃ । અહરહર્ગર્ભન્દધાથે ॥ ૪૪ ॥

તયોરેતૌ વત્સાવહોરાત્રે । પૃથિવ્યા અહઃ । દિવો રાત્રિઃ ।
તા અવિસૃષ્ટૌ । દમ્પતી એવ ભવતઃ । તયોરેતૌ વત્સૌ ।
અગ્નિશ્ચાદિત્યશ્ચ । રાત્રેર્વત્સઃ । શ્વેત આદિત્યઃ । અહોઽગ્નિઃ ॥ ૪૫ ॥

તામ્રો અરુણઃ । તા અવિસૃષ્ટૌ । દમ્પતી એવ ભવતઃ ।
તયોરેતૌ વત્સૌ । વૃત્રશ્ચ વૈદ્યુતશ્ચ । અગ્નેર્વૃત્રઃ । વૈદ્યુત આદિત્યસ્ય ।
તા અવિસૃષ્ટૌ । દમ્પતી એવ ભવતઃ । તયોરેતૌ વત્સૌ ॥ ૪૬ ॥

ઉષ્મા ચ નીહારશ્ચ । વૃત્રસ્યોષ્મા । વૈદ્યુતસ્ય નીહારઃ ।
તૌ તાવેવ પ્રતિપદ્યેતે । સેયꣳ રાત્રી ગર્ભિણી પુત્રેણ સંવસતિ ।
તસ્યા વા એતદુલ્બણમ્ । યદ્રાત્રૌ રશ્મયઃ ।

યથા ગોર્ગર્ભિણ્યા ઉલ્બણમ્ । એવમેતસ્યા ઉલ્બણમ્ ।
પ્રજયિષ્ણુઃ પ્રજયા ચ પશુભિશ્ચ ભવતિ ।
ય એવં વેદ । એતમુદ્યન્તમપિયન્તં ચેતિ ।
આદિત્યઃ પુણ્યસ્ય વત્સઃ । અથ પવિત્રાઙ્ગિરસઃ ॥ ૪૭ ॥

પવિત્રવન્તઃ પરિવાજમાસતે । પિતૈષાં પ્રત્નો અભિરક્ષતિ વ્રતમ્ ।
મહસ્સમુદ્રં વરુણસ્તિરોદધે । ધીરા ઇચ્છેકુર્ધરુણેષ્વારભમ્ ।
પવિત્રં તે વિતતં બ્રહ્મણસ્પતે । પ્રભુર્ગાત્રાણિ પર્યેષિવિશ્વતઃ ।
અતપ્તતનૂર્ન તદામો અશ્નુતે । શ઼ૃતાસ ઇદ્વહન્તસ્તત્સમાશત ।
બ્રહ્મા દેવાનામ્ । અસતસ્સદ્યે તતક્ષુઃ ॥ ૪૮ ॥

ઋશયસ્સપ્તાત્રિશ્ચ યત્ । સર્વેઽત્રયો અગસ્ત્યશ્ચ ।
નક્ષત્રૈશ્શઙ્કૃતોઽવસન્ । અથ સવિતુઃ શ્યાવાશ્વસ્યાઽવર્તિકામસ્ય ।
અમી ય ઋક્ષા નિહિતાસ ઉચ્ચા । નક્તં દદૃશ્રે કુહાચિદ્દિવેયુઃ ।
અદબ્ધાનિ વરુણસ્ય વ્રતાનિ । વિચાકશચ્ચન્દ્રમા નક્ષત્રમેતિ ।
તત્સવિતુર્વરેણ્યં । ભર્ગો દેવસ્ય ધીમહિ ॥ ૪૯ ॥

ધિયો યો નઃ પ્રચોદયાત્ । તત્સવિતુર્વૃણીમહે ।
વયન્દેવસ્ય ભોજનમ્ । શ્રેષ્ઠꣳ સર્વધાતમમ્ ।
તુરં ભગસ્ય ધીમહિ । અપાગૂહત સવિતા તૃભીન્ ।
સર્વાદિવો અન્ધસઃ । નક્તન્તાન્યભવન્દૃશે ।
અસ્થ્યસ્થ્ના સંભવિષ્યામઃ । નામ નામૈવ નામ મે ॥ ૫૦ ॥

નપુꣳસકં પુમાꣳસ્ત્ર્યસ્મિ । સ્થાવરોઽસ્મ્યથ જઙ્ગમઃ ।
યજેઽયક્ષિ યષ્ટાહે ચ । મયા ભૂતાન્યયક્ષત ।
પશવો મમ ભૂતાનિ । અનૂબન્ધ્યોઽસ્મ્યહં વિભુઃ ।
સ્ત્રિયસ્સતીઃ । તા ઉમે પુꣳસ આહુઃ ।
પશ્યદક્ષણ્વાન્નવિચેતદન્ધઃ । કવિર્યઃ પુત્રસ્ય ઇમા ચિકેત ॥ ૫૧ ॥

યસ્તા વિજાનાત્સવિતુઃ પિતાસત્ । અન્ધો મણિમવિન્દત્ ।
તમનઙ્ગુલિરાવયત્ । અગ્રીવઃ પ્રત્યમુઞ્ચત્ ।
તમજિહ્વા અસશ્ચત । ઊર્ધ્વમૂલમવાક્છાખમ્ ।
વૃક્ષં યો વેદ સમ્પ્રતિ । ન સ જાતુ જનઃ શ્રદ્દધ્યાત્ ।
મૃત્યુર્મા મારયાદિતિઃ । હસિતꣳ રુદિતઙ્ગીતમ્ ॥ ૫૨ ॥

વીણાપણવલાસિતમ્ । મૃતઞ્જીવં ચ યત્કિંચિત્

અઙ્ગાનિ સ્નેવ વિદ્ધિ તત્ । અતૃષ્યꣳ સ્તૃષ્યધ્યાયત્ ।
અસ્માજ્જાતા મે મિથૂ ચરન્ન્ । પુત્રો નિરૃત્યા વૈદેહઃ ।
અચેતા યશ્ચ ચેતનઃ । સ તં મણિમવિન્દત્ ।
સોઽનઙ્ગુલિરાવયત્ । સોઽગ્રીવઃ પ્રત્યમુઞ્ચત્ ॥ ૫૩ ॥

સોઽજિહ્વો અસશ્ચત । નૈતમૃશિં વિદિત્વા નગરં પ્રવિશેત્ ।
યદિ પ્રવિશેત્ । મિથૌ ચરિત્વા પ્રવિશેત્ ।
તથ્સમ્ભવસ્યં વ્રતમ્ । આતમગ્ને રથન્તિષ્ઠ ।
એકાશ્વમેકયોજનમ્ । એકચક્રમેકધુરમ્ ।
વાતધ્રાજિગતિં વિભો । ન રિષ્યતિ ન વ્યથતે ॥ ૫૪ ॥

નાસ્યાક્ષો યાતુ સજ્જતિ । યચ્છ્વેતાન્રોહિતાꣳ શ્ચાગ્નેઃ ।
રથે યુક્ત્વાઽધિતિષ્ઠતિ । એકયા ચ દશભિશ્ચ સ્વભૂતે ।
દ્વાભ્યામિષ્ટયે વિꣳ શત્યા ચ । તિસૃભિશ્ચ વહસે ત્રિꣳ શતા ચ ।
નિયુદ્ભિર્વાયવિહિતા વિમુઞ્ચ ॥ ૫૫ ॥

આતનુષ્વ પ્રતનુષ્વ । ઉદ્ધમાઽઽધમ સન્ધમ ।
આદિત્યે ચન્દ્રવર્ણાનામ્ । ગર્ભમાધેહિ યઃ પુમાન્ ।
ઇતસ્સિક્તꣳ સૂર્યગતમ્ । ચન્દ્રમસે રસઙ્કૃધિ ।
વારાદઞ્જનયાગ્રેઽગ્નિમ્ । ય એકો રુદ્ર ઉચ્યતે ।
અસઙ્ખ્યાતાસ્સહસ્રાણિ । સ્મર્યતે ન ચ દૃશ્યતે ॥ ૫૬ ॥

એવમેતન્નિબોધત । આમન્દ્રૈરિન્દ્ર હરિભિઃ ।
યાહિ મયૂરરોમભિઃ । મા ત્વા કેચિન્નિયેમુરિન્ન પાશિનઃ ।
દધન્વેવ તા ઇહિ । મા મન્દ્રૈરિન્દ્ર હરિભિઃ ।
યામિ મયૂરરોમભિઃ । મા મા કેચિન્નિયેમુરિન્ન પાશિનઃ ।
નિધન્વેવ તાં ( ૨ ) ઇમિ । અણુભિશ્ચ મહદ્ભિશ્ચ ॥ ૫૭ ॥

નિઘૃષ્વૈરસમાયુતૈઃ । કાલૈર્હરિત્વમાપન્નૈઃ ।
ઇન્દ્રાયાહિ સહસ્રયુક્ । અગ્નિર્વિભ્રાષ્ટિવસનઃ ।
વાયુશ્વેતસિકદ્રુકઃ । સંવથ્સરો વિષૂવર્ણૈઃ ।
નિત્યસ્તેઽનુચરાસ્તવ । સુબ્રહ્મણ્યોꣳ સુબ્રહ્મણ્યોꣳ સુબ્રહ્મણ્યોમ્ ।
ઇન્દ્રાગચ્છ હરિવ આગચ્છ મેધાતિથેઃ । મેષ વૃષણશ્વસ્ય મેને ॥ ૫૮ ॥

ગૌરાવસ્કન્દિન્નહલ્યાયૈ જાર । કૌશિકબ્રહ્મણ ગૌતમબ્રુવાણ ।
અરુણાશ્વ ઇહાગતાઃ । વસવઃ પૃથિવિક્ષિતઃ ।

અષ્ટૌદિગ્વાસસોઽગ્નયઃ । અગ્નિશ્ચ જાતવેદાશ્ચેત્યેતે ।
તમ્રાશ્વાસ્તામ્રરથાઃ । તામ્રવર્ણાસ્તથાઽસિતાઃ ।
દણ્ડહસ્તાઃ ખ્યાદગ્દતઃ । ઇતો રુદ્રાઃ પરાઙ્ગતાઃ ॥ ૫૯ ॥

ઉક્તꣳ સ્થાનં પ્રમાણઞ્ચ પુર ઇત । બૃહસ્પતિશ્ચ સવિતા ચ ।
વિશ્વરૂપૈરિહાગતામ્ । રથોનોદકવર્ત્મના ।
અપ્સુષા ઇતિ તદ્દ્વયોઃ । ઉક્તો વેષો વાસાꣳસિ ચ ।
કાલાવયવાનામિતઃ પ્રતીજ્યા । વાસાત્યા ઇત્યશ્વિનોઃ ।
કોઽન્તરિક્ષે શબ્દઙ્કરોતીતિ । વસિષ્ટો રૌહિણો મીમાꣳસાઞ્ચક્રે ।
તસ્યૈષા ભવતિ । વાશ્રેવ વિદ્યુદિતિ ।
બ્રહ્મણ ઉદરણમસિ । બ્રહ્ંઅણ ઉદીરણમસિ ।
બ્રહ્મણ આસ્તરણમસિ । બ્રહ્મણ ઉપસ્તરણમસિ ॥ ૬૦ ॥

[ અપક્રામત ગર્ભિણ્યઃ ]
અષ્ટયોનીમષ્ટપુત્રામ્ । અષ્ટપત્નીમિમાં મહીમ્ ।
અહં વેદ ન મે મૃત્યુઃ । નચામૃત્યુરઘાહરત્ ।
અષ્ટયોન્યષ્ટપુત્રમ્ । અષ્ટપદિદમન્તરિક્ષમ્ ।
અહં વેદ ન મે મૃત્યુઃ । નચામૃત્યુરઘાહરત્ ।
અષ્ટયોનીમષ્ટપુત્રામ્ । અષ્ટપત્નીમમૂન્દિવમ્ ॥ ૬૧ ॥

અહં વેદ ન મે મૃત્યુઃ । નચામૃત્યુરઘાહરત્ ।
સુત્રામાણાં મહીમૂષુ । અદિતિર્દ્યૌરદિતિરન્તરિક્ષમ્ ।
અદિતિર્માતા સ પિતા સ પુત્રઃ । વિશ્વે દેવા અદિતિઃ પઞ્ચજનાઃ ।
અદિતિર્જાતમદિતિજનિત્વમ્ । અષ્ટૌ પુત્રાસો અદિતેઃ ।
યે જાતાસ્તન્વઃ પરિ । દેવં ( ૨ ) ઉપપ્રૈત્સપ્તભિઃ ॥ ૬૨ ॥

પરા માર્તાણ્ડમાસ્યત્ । સપ્તભિઃ પુત્રૈરદિતિઃ ।
ઉપપ્રૈત્પૂર્વ્યં યુગમ્ । પ્રજાયૈ મૃત્યવે તત્ ।
પરા માર્તાણ્ડમાભરદિતિ । તાનનુક્રમિષ્યામઃ ।
મિત્રશ્ચ વરુણશ્ચ । ધાતા ચાર્યમા ચ ।
અꣳશશ્ચ ભગશ્ચ । ઇન્દ્રશ્ચ વિવસ્વાꣳશ્ચેત્યેતે ।
હિરણ્ય ગર્ભો હꣳસશ્શુચિષત્ ।
બ્રહ્મજજ્ઞાનં તદિત્પદમિતિ ગર્ભ પ્રાજાપત્યઃ ।
અથ પુરુષઃ સપ્ત પુરુષઃ ॥ ૬૩ ॥

[ યથાસ્થાનં ગર્ભિણ્યઃ ]

યોઽસૌ તપન્નુદેતિ । સ સર્વેષાં ભૂતાનાં પ્રાણાનાદાયોદેતિ ।

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણાનાદાયોદગાઃ ।

અસૌ યોઽસ્તમેતિ । સ સર્વેષાં ભૂતાનાં પ્રાણાનાદાયાઽસ્તમેતિ ।

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણાનાદાયાઽસ્તઙ્ગાઃ ।

અસૌ ય આપૂર્યતિ । સ સર્વેષાં ભૂતાનાં પ્રાણૈરાપૂર્યતિ ॥ ૬૪ ॥

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરાપૂરિષ્ઠાઃ ।

અસૌ યોઽપક્ષીયતિ । સ સર્વેષાં ભૂતાનાં પ્રાણૈરપક્ષીયતિ ।

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપક્ષેષ્ઠાઃ ।

અમૂનિ નક્ષત્રાણિ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પન્તિ ચોત્સર્પન્તિ ચ ।

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપત મોત્સૃપત ॥ ૬૫ ॥

ઇમે માસાશ્ચાર્ધમાસાશ્ચ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પન્તિ ચોત્સર્પન્તિ ચ ।

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપત મોત્સૃપત ।

ઇમ ઋતવઃ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પન્તિ ચોત્સર્પન્તિ ચ ।

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપત મોત્સૃપત ।

અય ँ સંવત્સરઃ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પતિ ચોત્સર્પતિ ચ ॥ ૬૬ ॥

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપ મોત્સૃપ ।

ઇદમહઃ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પતિ ચોત્સર્પતિ ચ ।

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપ મોત્સૃપ ।

ઇય ँ રાત્રિઃ । સર્વેષાં ભૂતાનાં પ્રાણૈરપપ્રસર્પતિ ચોત્સર્પતિ ચ ।

મા મે પ્રજયા મા પશૂનામ્ । મા મમ પ્રાણૈરપપ્રસૃપ મોત્સૃપ ।

ૐ ભૂર્ભુવસ્સ્વઃ । એતદ્વો મિથુનં મા નો મિથુન ँ રીઢ્વમ્ ॥ ૬૭ ॥

અથાદિત્યસ્યાષ્ટપુરુષસ્ય ।

વસૂનામાદિત્યાન ँ સ્થાને સ્વતેજસા ભાનિ ।

રુદ્રાણામાદિત્યાન ँ સ્થાને સ્વતેજસા ભાનિ ।

આદિત્યાનામાદિત્યાન ँ સ્થાને સ્વતેજસા ભાનિ ।

સતા ँ સત્યાનામ્ । આદિત્યાન ँ સ્થાને સ્વતેજસા ભાનિ ।

અભિધૂન્વતામભિઘ્નતામ્ । વાતવતાં મરુતામ્ ।

આદિત્યાન ँ સ્થાને સ્વતેજસા ભાનિ ।

ઋભૂણામાદિત્યાન ँ સ્થાને સ્વતેજસા ભાનિ ।

વિશ્વેષાન્દેવાનામ્ । આદિત્યાનꣳ સ્થાને સ્વતેજસા ભાનિ ।
સંવત્સરસ્ય સવિતુઃ । આદિત્યસ્ય સ્વતેજસા ભાનિ ।
ૐ ભૂર્ભુવસ્સ્વઃ । રશ્મયો વો મિથુનં મા નો મિથુનꣳ રીઢ્વમ્ ॥ ૬૮ ॥

આરોગસ્ય સ્થાને સ્વતેજસા ભાનિ । ભ્રાજસ્ય  સ્થાને સ્વતેજસા ભાનિ ।
પટરસ્ય સ્થાને સ્વતેજસા ભાનિ । પતઙ્ગસ્ય સ્થાને સ્વતેજસા ભાનિ ।
સ્વર્ણરસ્ય સ્થાને સ્વતેજસા ભાનિ । જ્યોતિષીમતસ્ય સ્થાને સ્વતેજસા ભાનિ ।
વિભાસસ્ય સ્થાને સ્વતેજસા ભાનિ । કશ્યપસ્ય સ્થાને સ્વતેજસા ભાનિ ।
ૐ ભૂર્ભુવસ્સ્વઃ । આપો વો મિથુનં મા નો મિથુનꣳ રીઢ્વમ્ ॥ ૬૯ ॥

અથ વયોરેકાદશપુરુષસ્યૈકાદશસ્ત્રીકસ્ય ।
પ્રભ્રાજમાનાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
વ્યવદાતાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
વાસુકિવૈદ્યુતાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
રજતાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
પરુષાણાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
શ્યામાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
કપિલાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
અતિલોહિતાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
ઊર્ધ્વાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ॥ ૭૦ ॥

અવપતન્તાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
વૈદ્યુતાનાꣳ  રુદ્રાણાꣳ સ્થાને સ્વતેજસા ભાનિ ।
પ્રભ્રાજમાનીનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
વ્યવદાતીનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
વાસુકિવૈદ્યુતીનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
રજતાનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
પરુષાણાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
શ્યામાનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
કપિલાનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
અતિલોહિતીનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
ઊર્ધ્વાનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
અવપતન્તીનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।
વૈદ્યુતીનાꣳ  રુદ્રાણીનાꣳ સ્થાને સ્વતેજસા ભાનિ ।

ૐ ભૂર્ભુવસ્સ્વઃ । રૂપાણિ વો મિથુનં મા નો મિથુનꣳ રીઢ્વમ્ ॥ ૭૧ ॥

અથાગ્નેરષ્ટપુરુષસ્ય ।
અગ્નેઃ પૂર્વદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
જાતવેદસ ઉપદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
સહોજસો દક્ષિણદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
અજિરાપ્રભવ ઉપદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
વૈશ્વાનરસ્યાઽપરદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
નર્યાપસ ઉપદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
પઙ્ક્તિરાધસૌદગ્દિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
વિસર્પિણ ઉપદિશ્યસ્ય સ્થાને સ્વતેજસા ભાનિ ।
ૐ ભૂર્ભુવસ્સ્વઃ । રૂપાણિ વો મિથુનં મા નો મિથુનꣳ રીઢ્વમ્ ॥ ૭૨ ॥

દક્ષિણપૂર્વસ્યાન્દિશિ વિસર્પી નરકઃ । તસ્માન્નઃ પરિપાહિ ।
દક્ષિણાપરસ્યાં દિશ્યવિસર્પી નરકઃ । તસ્માન્નઃ પરિપાહિ ।
ઉત્તરપૂર્વસ્યાન્દિશિ વિષાદી નરકઃ । તસ્માન્નઃ પરિપાહિ ।
ઉત્તરપરસ્યાન્દિશ્યવિષાદી નરકઃ । તસ્માન્નઃ પરિપાહિ ।
આ યસ્મિન્ત્સપ્ત વાસવા ઇન્દ્રિયાણિ શતક્રતવિત્યેતે ॥ ૭૩ ॥

ઇન્દ્રઘોષા વો વસુભિઃ પુરસ્તાદુપદધતામ્ ।
મનોજવસો વઃ પિતૃભિર્દક્ષિણત ઉપદધતામ્ ।
પ્રચેતા વો રુદ્રૈઃ પશ્ચાદુપદધતામ્ ।
વિશ્વકર્મા વ આદિત્યરુત્તરત ઉપદધતામ્ ।
ત્વષ્ટા વો રૂપૈરુપરિષ્ટાદુપદધતામ્ ।
સંજ્ઞાનં વઃ પશ્ચાદિતિ । આદિત્યસ્સર્વોઽગ્નિઃ પૃથિવ્યામ્ ।
વાયુરન્તરિક્ષે । સૂર્યો દિવિ । ચન્દ્રમા દિક્ષુ ।
નક્ષત્રાણિ સ્વલોકે । એવા હ્યેવ । એવા હ્યગ્ને ।
એવા હિ વાયો । એવા હીન્દ્ર । એવા હિ પૂષન્ । એવા હિ દેવાઃ ॥ ૭૪ ॥

આપમાપામપસ્સર્વાઃ । અસ્માદસ્માદિતોઽમુતઃ
અગ્નિર્વાયુશ્ચ સૂર્યશ્ચ । સહ સઞ્ચસ્કરર્દ્ધિયા ।
વાય્વશ્વા રશ્મિપતયઃ । મરીચ્યાત્મનો અદ્રુહઃ ।
દેવીર્ભુવનસૂવરીઃ । પુત્રવત્ત્વાય મે સુત ।
મહાનામ્નીર્મહામાનાઃ । મહસો મહસસ્સ્વઃ ॥ ૭૫ ॥

દેવીઃ પર્જન્યસૂવરીઃ । પુત્રવત્વાય મે સુત ।
અપાઽશ્ચુષ્ણિમપા રક્ષઃ । અપાઽઽશ્ચુષ્ણિમપારઘમ્ ।
અપાઘ્રામપચાઽવર્તિમ્ । અપદેવીરિતો હિત ।
વજ્ન્દેવીરજીતાꣳશ્ચ । ભુવનન્દેવસૂવરીઃ ।
આદિત્યાનદિતિન્દેવીમ્ । યોનિનોર્ધ્વમુદીષત ॥ ૭૬ ॥

ભદ્રં કર્ણેભિઃ શ◌ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳસસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
કેતવો અરુણાસશ્ચ । ઋષયો વાતરશનાઃ ।
પ્રતિષ્ઠાꣳશતધા હિ । સમાહિતાસો સહસ્રધાયસમ્ ।
શિવા નશ્શન્તમા ભવન્તુ । દિવ્યા આપ ઓષધયઃ ।
સુમૃડીકા સરસ્વતિ । મા તે વ્યોમ સન્દૃશિ ॥ ૭૭ ॥

યોઽપાં પુષ્પં વેદ । પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ ।
ચન્દ્રમા વા અપાં પુષ્પમ્ । પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ ।
આયતનવાન્ ભવતિ । અગ્નિર્વા અપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યોઽગ્નેરાયતનં વેદ ॥ ૭૮ ॥

આયતનવાન્ ભવતિ । આપો વા અગ્નેરાયતનમ્ ।
આયતનવાન્ ભવતિ । ય એવં વેદ ।
યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ।
વાયુર્વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યો વાયોરાયતનં વેદ । આયતનવાન્ ભવતિ ॥ ૭૯ ॥

આપો વૈ વાયોરાયતનમ્ । આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ ।
આયતનવાન્ ભવતિ । અસૌ વૈ તપન્નપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યોઽમુષ્ય તપત આયતનં વેદ ।
આયતનવાન્ ભવતિ । આપો વા અમુષ્ય તપત આયતનમ્ ॥ ૮૦ ॥

આયતનવાન્ ભવતિ । ય એવં વેદ ।
યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ ।

ચન્દ્રમા વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યશ્ચન્દ્રમસ આયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વૈ ચન્દ્રમસ આયતનમ્ । આયતનવાન્ ભવતિ ॥ ૮૧ ॥

ય એવં વેદ । યોઽપામાયતનં વેદ ।
આયતનવાન્ ભવતિ । નક્ષત્રાણિ વા અપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યો નક્ષત્રાણામાયતનં વેદ ।
આયતનવાન્ ભવતિ । આપો વૈ નક્ષત્રાણામાયતનમ્ ।
આયતનવાન્ ભવતિ । ય એવં વેદ ॥ ૮૨ ॥

યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ
પર્જન્યો વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યઃ પર્જન્યસ્યાયતનં વેદ । આયતનવાન્ ભવતિ ।
આપો વૈ પર્જન્યસ્યાઽઽયતનમ્ । આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ ॥ ૮૩ ॥

આયતનવાન્ ભવતિ । સંવત્સરો વા અપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યસ્સંવત્સરસ્યાયતનં વેદ ।
આયતનવાન્ ભવતિ । આપો વૈ સંવત્સરસ્યાયતનમ્ ।
આયતનવાન્ ભવતિ । ય એવં વેદ ।
યોઽપ્સુ નાવં પ્રતિષ્ઠિતાં વેદ । પ્રત્યેવ તિષ્ઠતિ ॥ ૮૪ ॥

ઇમે વૈ લોકા અપ્સુ પ્રતિષ્ઠિતાઃ । તદેષાઽભ્યનૂક્તા ।
અપાꣳ રસમુદયꣳ સન્ન્ । સૂર્યે શુક્રꣳ સમાભૃતમ્ ।
અપાꣳ રસસ્ય યો રસઃ । તં વો ગૃહ્ણામ્યુત્તમમિતિ ।
ઇમે વૈ લોકા અપાꣳ રસઃ । તેઽમુષ્મિન્નાદિત્યે સમાભૃતાઃ ।
જાનુદઘ્નીમુત્તરવેદીઙ્ખાત્વા । અપાં પૂરયિત્વા ગુલ્ફદઘ્નમ્ ॥ ૮૫ ॥

પુષ્કરપર્ણૈઃ પુષ્કરદણ્ડૈઃ પુષ્કરૈશ્ચ સꣳસ્તીર્ય । તસ્મિન્વિહાયસે ।
અગ્નિં પ્રણીયોપસમાધાય । બ્રહ્મવાદિનો વદન્તિ ।
કસ્માત્પ્રણીતેઽયમગ્નિશ્ચીયતે । સાપ્રણીતેઽયમપ્સુ હ્યયઞ્ચીયતે ।
અસૌ ભુવનેપ્યનાહિતાગ્નિરેતાઃ । તમભિત એતા અબીષ્ટકા ઉપદધાતિ ।
અગ્નિહોત્રે દર્શપૂર્ણમાસયોઃ । પશુબન્ધે ચાતુર્માસ્યેષુ ॥ ૮૬ ॥

અથો આહુઃ । સર્વેષુ યજ્ઞક્રતુષ્વિતિ ।
એતદ્ધ સ્મ વા આહુશ્શણ્ડિલાઃ । કમગ્નિઞ્ચિનુતે ।

સત્રિયમગ્નિઞ્ચિન્વાનઃ । સંવત્સરં પ્રત્યક્ષેણ ।
કમગ્નિઞ્ચિનુતે । સાવિત્રમગ્નિઞ્ચિન્વાનઃ ।
અમુમાદિત્યં પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે ॥ ૮૭ ॥

નાચિકેતમગ્નિઞ્ચિન્વાનઃ ।
પ્રાણાન્પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે । ચાતુહોત્રિયમગ્નિઞ્ચિન્વાનઃ ।
બ્રહ્મ પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે । વૈશ્વસૃજમગ્નિઞ્ચિન્વાનઃ ।
શરીરં પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે । ઉપાનુવાક્યમાશુમગ્નિઞ્ચિન્વાનઃ ॥ ૮૮ ॥

ઇમાન્ લોકાન્પ્રત્યક્ષેણ । કમગ્નિઞ્ચિનુતે । ઇમમારુણકેતુકમગ્નિઞ્ચિન્વાનઃ ।
ય એવાસૌ । ઇતશ્ચાઽમુતશ્ચાઽવ્યતીપતી । તમિતિ ।
યોઽગ્નેર્મિથૂયા વેદ । મિથુનવાન્ભવતિ ।
આપો વા અગ્નેર્મિથૂયાઃ । મિથુનવાન્ભવતિ । ય એવં વેદ ॥ ૮૯ ॥

આપો વા ઇદમાસન્ત્સલિલમેવ । સ પ્રજાપતિરેકઃ પુષ્કરપર્ણે સમભવત્ ।
તસ્યાન્તર્મનસિ કામસ્સમવર્તત । ઇદꣳ સૃજેયમિતિ ।
તસ્માદ્યત્પુરુષો મસભિગચ્છતિ । તદ્વાચા વદતિ ।
તત્કર્મણા કરોતિ । તદેષાઽભ્યનૂક્તા ।
કામસ્તદગ્રે સમવર્તતાધિ । મનસો રેતઃ પ્રથમં યદાસીત્ ॥ ૯૦ ॥

સતો બન્ધુમસતિ નિરવિન્દન્ન્ । હૃદિ પ્રતીષ્યા કવયો મનીષેતિ ।
ઉપૈનન્તદુપનમતિ । યત્કામો ભવતિ । ય એવં વેદ ।
સ તપોઽતપ્યત । સ તપસ્તપ્ત્વા । શરીરમધૂનુત । તસ્ય યન્માꣳ સમાસીત્ ।
તતોઽરુણાઃ કેતવો વાતરશના ઋષય ઉદતિષ્ઠન્ન્ ॥ ૯૧ ॥

યે નખાઃ । તે વૈખાનસાઃ । યે વાલાઃ । તે વાલખિલ્યાઃ ।
યો રસઃ । સોઽપામ્ । અન્તરતઃ કૂર્મં ભૂતꣳ સર્પન્તમ્ ।
તમબ્રવીત્ । મમ વૈત્વઙ્માꣳ સા । સમભૂત્ ॥ ૯૨ ॥

નેત્યબ્રવીત્।પૂર્વમેવાહમિહાસનિતિ ।
તત્પુરુષસ્ય પુરુષત્વમ્ । સ સહસ્રશીર્ષા પુરુષઃ ।
સહસ્રાક્ષસ્સહસ્રપાત્ । ભૂત્વોદતિષ્ઠત્ ।
તમબ્રવીત્ । ત્વં વૈ પૂર્વꣳ સમભૂઃ ।
ત્વમિદં પૂર્વઃ કુરુષ્વેતિ । સ ઇત આદાયાપઃ । ॥ ૯૩ ॥

અઞ્જલિના પુરસ્તાદુપાદધાત્ । એવાહ્યેવેતિ ।
તત આદિત્ય ઉદતિષ્ઠત્ । સા પ્રાચી દિક્ ।

અથાઽરુણઃ । કેતુર્દક્ષિણત ઉપાદધાત્ ।
એવાહ્યગ્ન ઇતિ । તતો વા અગ્નિરુદતિષ્ઠત્ ।
સા દક્ષિણા દિક્ । અથારુણઃ કેતુઃ પશ્ચાદુપદધાત્ ।
એવાહિ વાયો ઇતિ ॥ ૯૪ ॥

તતો વાયુરુદતિષ્ઠત્ । સા પ્રતીચી દિક્ ।
અથારુણઃ કેતુરુત્તરત ઉપાદધાત્ । એવાહીન્દ્રેતિ ।
તતો વા ઇન્દ્ર ઉદતિષ્ઠત્ । સોદીચી દિક્ ।
અથારુણઃ કેતુર્મધ્ય ઉપાદધાત્ ।  એવાહિ પૂષન્નિતિ ।
તતો વૈ પૂષોદતિષ્ઠત્ । સેયન્દિક્ ॥ ૯૫ ॥

અથારુણઃ કેતુરુપરિષ્ટાદુપાદધાત્ । એવાહિ દેવા ઇતિ ।
તતો દેવમનુષ્યાઃ પિતરઃ । ગન્ધર્વાપ્સરસશ્ચોદતિષ્ઠન્ ।
સોર્ધ્વા દિક્ । યા વિપ્રુષો વિપરાપતન્ ।
તાભ્યોઽસુરા રક્ષાꣳસિ પિશાચાશ્ચોદતિષ્ઠન્ । તસ્માત્તે પરાભવન્ ।
વિપ્રુડ્ભ્યો હિ તે સમભવન્ । તદેષાભ્યનૂક્તા ॥ ૯૬ ॥

આપો હ યદ્બૃહતીર્ગર્ભમાયન્ । દક્ષન્દધાના જનયન્તીસ્સ્વયંભુમ્ ।
તત ઇમેધ્યસૃજ્યન્ત સર્ગાઃ । અદ્ભ્યો વા ઇદꣳ સમભૂત્ ।
તસ્માદિદꣳ સર્વં બ્રહ્મ સ્વયંભ્વિતિ ।
તસ્માદિદꣳ સર્વꣳ શિથિલમિવાઽધ્રુવમિવાભવત્ ।
પ્રજાપતિર્વાવ તત્ । આત્મનાત્માનં વિધાય ।
તદેવાનુપ્રાવિશત્ ।  તદેષાભ્યનૂક્તા ॥ ૯૭ ॥

વિધાય લોકાન્ વિધાય ભૂતાનિ । વિધાય સર્વાઃ પ્રદિશો દિશશ્ચ ।
પ્રજાપતિઃ પ્રથમજા ઋતસ્ય । આત્મનાત્માનમભિ સંવિવેશેતિ ।
સર્વમેવેદમાપ્ત્વા । સર્વમવરુદ્ધ્ય ।
તદેવાનુપ્રવિશતિ । ય એવં વેદ ॥ ૯૮ ॥

ચતુષ્ટય્ય આપો ગૃહ્ણાતિ । ચત્વારિ વા અપાꣳ રૂપાણિ ।
મેઘો વિદ્યુત્ । સ્તનયિત્નુર્વૃષ્ટિઃ । તાન્યેવાવરુન્ધે ।
આતપતિ વર્ષ્યા ગૃહ્ણાતિ । તાઃ પુરસ્તાદુપદધાતિ ।
એતા વૈ બ્રહ્મવર્ચસ્યા આપઃ । મુખત એવ બ્રહ્મવર્ચસમવરુન્ધે ।
તસ્માન્મુખતો બ્રહ્મવર્ચસિતરઃ ॥ ૯૯ ॥

કૂપ્યા ગૃહ્ણાતિ । તા દક્ષિણત ઉપદધાતિ ।

એતા વૈ તેજસ્વિનીરાપઃ । તેજ એઽવાસ્ય દક્ષિણતો દધાતિ ।
તસ્માદ્દક્ષિણોઽર્ધસ્તેજસ્વિતરઃ । સ્થાવરા ગૃહ્ણાતિ ।
તાઃ પશ્ચાદુપદધાતિ । પ્રતિષ્ઠિતા વૈ સ્થાવરાઃ ।
પશ્ચાદેવ પ્રતિતિષ્ઠતિ । વહન્તીર્ગૃહ્ણાતિ ॥૧૦૦ ॥

તા ઉત્તરત ઉપદધાતિ ।
ઓજસા વા એતા વહન્તીરિવોદ્ધતીરિવ આકૂજતીરિવ ધાવન્તીઃ ।
ઓજ એવાસ્યોત્તરતો દધાતિ । તસ્માદુત્તરોઽર્ધ ઓજસ્વિતરઃ ।
સંભાર્યા ગૃહ્ણાતિ । તા મધ્ય ઉપદધાતિ ।
ઇયં વૈ સંભાર્યાઃ । અસ્યામેવ પ્રતિતિષ્ઠતિ ।
પલ્વલ્યા ગૃહ્ણાતિ । તા ઉપરિષ્ટાદુપાદધાતિ ॥ ૧૦૧ ॥

અસૌ વૈ પલ્વયાઃ । અમુષ્યામેવ પ્રતિતિષ્ઠતિ ।
દિક્ષૂપદધાતિ । દિક્ષુ વા આપઃ ।
અન્નં વા આપઃ । અદ્ભ્યો ચા અન્નઞ્જાયતે ।
યદેવદ્ભ્યોઽન્નઞ્જાયતે । તદવરુન્ધે ।
તં વા એતમરુણાઃ કેતવો વાતરશનાઽઋષયોઽચિન્વન્ ।
તસ્માદારુણકેતુકઃ ॥ ૧૦૨ ॥

તદેષાભ્યનૂક્તા । કેતવો અરુણાસશ્ચ ।
ઋષયો વાતરશનાઃ । પ્રતિષ્ઠાँ શતધાહિ ।
સમાહિતાસો સહસ્રધાયસમિતિ । શતશશ્ચૈવ સહસ્રશશ્ચ પ્રતિતિષ્ઠતિ ।
ય એતમગ્નિઞ્ચિનુતે ય ઉચૈનમેવં વેદ ॥ ૧૦૩ ॥

જાનુદઘ્નીમુત્તરવેદીઙ્ખાત્વા । અપાં પૂરયતિ ।
આપँ સર્વત્વાય । પુષ્કરપર્ણँ રુક્મં પુરુષમિત્યુપદધાતિ ।
તપો વૈ પુષ્કરપર્ણમ્ । સત્યँ રુક્મઃ । અમૃતં પુરુષઃ ।
એતાવદ્વા વાસ્તિ । યાવદેતત્ । યાવદેવાસ્તિ ॥ ૧૦૪ ॥

તદવરુન્ધે । કૂર્મમુપદધાતિ ।
અપામેવ મેધમવરુન્ધે । અથો સ્વર્ગસ્ય લોકસ્ય સમષ્ટ્યૈ ।
આપમાપામપસ્સર્વાઃ । અસ્માદસ્માદિતોઽમુતઃ ।
અગ્નિર્વાયુશ્ચ સૂર્યશ્ચ । સહસઞ્ચસ્કરર્દ્ધિયા ઇતિ ।
વાય્વશ્વા રશ્મિપતયઃ । લોકં પૃણચ્છિદ્રં પૃણ ॥ ૧૦૫ ॥

યાસ્તિસ્રઃ પરમજાઃ । ઇન્દ્રઘોષા વો વસુભિરેવાહ્યેવેતિ ।

પઞ્ચચિતય ઉપદધાતિ । પાઙ્ક્તોઽગ્નિઃ ।
યાવનેવાગ્નિઃ । તઞ્ચિનુતે ।
લોકંપૃણયા દ્વિતીયામુપદધાતિ । પઞ્ચ પદા વૈ વિરાટ્ ।
તસ્યા વા ઇયં પાદઃ । અન્તરિક્ષં પાદઃ । દ્યૌઃ પાદઃ ।
દિશઃ પાદઃ । પરોરજાઃ પાદઃ । વિરાજ્યેવ પ્રતિતિષ્ઠતિ ।
ય એતમગ્નિઞ્ચિનુતે । ય ઉચૈનમેવં વેદ ॥ ૧૦૬ ॥

અગ્નિં પ્રણીયોપસમાધાય । તમભિત એતા અબીષ્ટકા ઉપદધાતિ ।
અગ્નિહોત્રે દર્શપૂર્ણમાસયોઃ । પશુબન્ધે ચાતુર્માસ્યેષુ ।
અથો આહુઃ । સર્વેષુ યજ્ઞક્રતુષ્વિતિ ।
અથ હસ્માહારુણસ્સ્વાયંભુવઃ । સાવિત્રઃ સર્વોઽગ્નિરિત્યનનુષઙ્ગં મન્યામહે ।
નાના વા એતેષાં વીર્યાણિ । કમગ્નિઞ્ચિનુતે ॥ ૧૦૭ ॥

સત્રિયમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
સાવિત્રમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
નાચિકેતમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
ચાતુર્હોત્રિયમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
વૈશ્વસૃજમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ॥ ૧૦૮
ઉપાનુવાક્યમાશુમગ્નિઞ્ચિવાનઃ । કમગ્નિઞ્ચિનુતે ।
ઇમમારુણકેતુકમગ્નિઞ્ચિવાન ઇતિ । વૃષા વા અગ્નિઃ ।
વૃષાણૌ સꣳ સ્ફાલયેત્ । હન્યેતાસ્ય યજ્ઞઃ ।
તસ્માન્નાનુષજ્યઃ । સોત્તરવેદિષુ ક્રતુષુ ચિન્વીત ।
ઉત્તરવેદ્યાꣳ હ્યગ્નિશ્ચીયતે । પ્રજાકામશ્ચિન્વીત ॥ ૧૦૯ ॥

પ્રાજાપત્યો વા એષોઽગ્નિઃ । પ્રાજાપત્યાઃ પ્રજાઃ ।
પ્રજાવાન્ ભવતિ । ય એવં વેદ ।
પશુકામશ્ચિન્વીત । સંજ્ઞાનં વા એતત્ પશૂનામ્ ।
યદાપઃ પ્શૂનામેવ સંજ્ઞાનેઽગ્નિઞ્ચિનુતે ।
પ્શુમાન્ ભવતિ । ય એવં વેદ ॥ ૧૧૦ ॥

વૃષ્ટિકામશ્ચિન્વીત । આપો વૈ વૃષ્ટિઃ ।
પર્જન્યો વર્ષુકો ભવતિ । ય એવં વેદ ।
આમયાવી ચિન્વીત । આપો વૈ ભેષજમ્ ।
ભેષજમેવાસ્મૈ કરોતિ । સર્વમાયુરેતિ ।

અભિચરꣳશ્ચિન્વીત । વજ્રો વૈ આપઃ ॥ ૧૧૧ ॥

વજ્રમેવ ભ્રાતૃવ્યેભ્યઃ પ્રહરતિ। સ્તૃણુત એનમ્ ।
તેજસ્કામો યશસ્કામઃ । બ્રહ્મવર્ચસકામસ્સ્વર્ગકામશ્ચિન્વીત ।
એતાવદ્વા વાસ્તિ । યાવદેતત્ ।
યાવદેવાસ્તિ । તદવરુન્ધે ।
તસ્યૈતદ્ વ્રતમ્ । વર્ષતિન ધાવેત્ ॥ ૧૧૨ ॥

અમૃતં વા આપઃ । અમૃતસ્યાનન્તરિત્યૈ ।
નાપ્સુ મૂત્રપુરીષઙ્કુર્યાત્ । ન નિષ્ઠીવેત્ ।
ન વિવસનસ્સ્નાયાત્ । ગુહ્યો વા એષોઽગ્નિઃ ।
એતસ્યાગ્નેરનતિદાહાય । ન પુષ્કરપર્ણાનિ હિરણ્યંવાઽધિતિષ્ઠેત્ ।
એતસ્યાગ્નેરનભ્યારોહાય । ન કૂર્મસ્યાશ્નીયાત્ ।
નોદકસ્યાઘાતુકાન્યેનમોદકાનિ ભવન્તિ । અઘાતુકા આપઃ ।
ય એતમગ્નિઞ્ચિનુતે । ય ઉચૈનમેવં વેદ ॥ ૧૧૩ ॥

ઇમાનુકં ભુવના સીષધેમ । ઇન્દ્રશ્ચ વિશ્વે ચ દેવાઃ ।
યજ્ઞશ્ચ નસ્તન્વઞ્ચ પ્રજાઞ્ચ । આદિત્યૈરિન્દ્રસ્સસહ સીષધાતુ ।
આદિત્યૈરિન્દ્રસ્સગણો મરુદ્ભિઃ । અસ્માકં ભૂત્વવિતા તનૂનામ્ ।
આપ્લવસ્વ પ્રપ્લવસ્વ । આણ્ડીભવજ મા મુહુઃ ।
સુખાદીન્દુઃખનિધનામ્ । પ્રતિમુઞ્ચસ્વ સ્વાં પુરમ્ ॥ ૧૧૪ ॥

મરીચયસ્સ્વાયંભુવાઃ । યે શરીરાણ્યકલ્પયન્ ।
તે તે દેહઙ્કલ્પયન્તુ । મા ચ તે ખ્યાસ્મ તીરિષત્ ।
ઉત્તિષ્ઠત મા સ્વપ્ત । અગ્નિમિચ્છધ્વં ભારતાઃ ।
રાજ્ઞસ્સોમસ્ય તૃપ્તાસઃ । સૂર્યેણ સયુજોષસઃ ।
યુવા સુવાસાઃ । અષ્ટાચક્રા નવદ્વારા ॥ ૧૧૫ ॥

દેવાનાં પૂરયોધ્યા । તસ્યાꣳહિરણ્મયઃ કોશઃ ।
સ્વર્ગો લોકો જ્યોતિષાઽઽવૃતઃ । યો વૈ તાં બ્રહ્મણો વેદ ।
અમૃતેનાઽઽવૃતાં પુરીમ્ । તસ્મૈ બ્રહ્મ ચ બ્રહ્મા ચ ।
આયુઃ કીર્તિં પ્રજાન્દદુઃ । વિભ્રાજમાનાꣳહરિણીમ્ ।
યશસા સમ્પરીવૃતામ્ । પુરꣳહિરણ્મયીં બ્રહ્મા ॥ ૧૧૬ ॥

વિવેશાઽપરાજિતા । પરાઙ્ગેત્યજ્યામયી ।
પરાઙ્ગેત્યનાશકી । ઇહચામુત્રચાન્વેતિ ।

વિદ્વાન્દેવાસુરાનુભયાન્ । યત્કુમારી મન્દ્રયતે ।
યદ્યોષદ્યત્પતિવ્રતા । અરિષ્ટં યત્કિંચ ક્રિયતે ।
અગ્નિસ્તદનુવેધતિ । અશ꣡ૃતાસશ્શ꣡ૃતાસશ્ચ ॥ ૧૧૭ ॥

યજ્વાનો યેઽપ્યયજ્વનઃ । સ્વર્યન્તો નાપેક્ષન્તે ।
ઇન્દ્રમગ્નિશ્ચ યે વિદુઃ । સિકતા ઇવ સંયન્તિ ।
રશ્મિભિસ્સમુદીરિતાઃ । અસ્માલ્લોકાદમુષ્માચ્ચ ।
ઋષિભિરદાત્પૃશ્નિભિ ।
અપેત વીત વિ ચ સર્પતાતઃ યેઽત્રસ્થ પુરાણા યે ચ નૂતનાઃ ।
અહોભિરદ્ભિરક્તુભિર્વ્યક્તમ્ ॥ ૧૧૮ ॥

યમો દદાત્વવસાનમસ્મૈ । નૃ મુણન્તુ નૃપાત્વર્યઃ ।
અકૃષ્ટા યે ચ કૃષ્ટજાઃ । કુમારીષુ કનીનીષુ ।
જારિણીષુ ચ યે હિતાઃ । રેતઃપીતા આણ્ડપીતાઃ ।
અઙ્ગારેષુ ચ યે હુતાઃ । ઉભયાન્ પુત્રપૌત્રકાન્ ।
યુવેઽહં યમરાજગાન્ । શતમિન્નુ શરદઃ ॥ ૧૧૯ ॥

અદો યદ્બ્રહ્મ વિલબમ્ । પિતૃણાઞ્ચ યમસ્ય ચ ।
વરુણસ્યાશ્વિનોરગ્નેઃ । મરુતાઞ્ચ વિહાયસામ્ ।
કામપ્રયવણં મે અસ્તુ । સ હ્યેવાસ્મિ સનાતનઃ ।
ઇતિ નાકો બ્રહ્મિશ્રવો રાયો ધનમ્ । પુત્રાનાપો દેવીરિહાઽઽહિત ॥ ૧૨૦ ॥

વિશીર્ષ્ણીઙ્ગૃધ્રશીર્ષ્ણીઞ્ચ । અપેતોનિરૃતિꣳ હથઃ ।
પરિબાધꣳ શ્વેતકુક્ષમ્ । નિજઙ્ઘꣳ શબલોદરમ્ ।
સ તાન્ વાચ્યાયયા સહ । અગ્ને નાશય સન્દૃશઃ ।
ઈર્ષ્યાસૂયે બુભુક્ષામ્ । મન્યું કૃત્યાં ચ દીધિરે ।
રથેન કિꣳ શુકાવતા । અગ્ને નાશય સન્દૃશઃ ॥ ૧૨૧ ॥

પર્જન્યાય પ્રગાયત । દિવસ્પુત્રાય મીઢુષે ।
સ નો યવસમિચ્છતુ। ઇદં વચઃ પર્જન્યાય સ્વરાજે ।
હૃદો અસ્ત્વન્તરન્તદ્યુયોત । મયોભૂર્વાતો વિશ્વકૃષ્ટયસ્સન્ત્વસ્મે ।
સુપિપ્પલા ઓષધીર્દેવગોપાઃ । યો ગર્ભમોષધીનમ્ ।
ગવાકૃણોત્યર્વતામ્ । પર્જન્યઃ પુરૂષીણામ્ ॥ ૧૨૨ ॥

પુનર્મામૈત્વિન્દ્રિયમ્ । પુનરાયુઃ પુનર્ભગઃ ।
પુનર્બ્રાહ્મણમૈતુ મા । પુનર્દ્રવિણમૈતુ મા ।

યન્મેઽદ્ય રેતઃ પૃથિવીમસ્કાન્ । યદોષધીરપ્યસરદ્યદાપઃ ।
ઇદન્તત્પુનરાદદે । દીર્ઘાયુત્વાય વર્ચસે ।
યન્મે રેતઃ પ્રસિચ્યતે । યન્મ આજાયતે પુનઃ ।
તેન મામમૃતં કુરુ । તેન સુપ્રજસઙ્કુરુ ॥ ૧૨૩ ॥

અદ્ભ્યસ્તિરોધાઽજાયત । તવ વૈશ્રવણસ્સદા ।
તિરોધેહિ સપત્નાન્નઃ । યે અપોઽશ્નન્તિ કેચન ।
ત્વાષ્ટ્રીં માયાં વૈશ્રવણઃ । રથꣳ સહસ્રવન્ધુરમ્ ।
પુરુશ્ચક્રꣳ સહસ્રાશ્વમ્ । આસ્થાયાયાહિ નો બલિમ્ ।
યસ્મૈ ભૂતાનિ બલિમાવહન્તિ । ધનઙ્ગાવો હસ્તિહિરણ્યમશ્વાન્ ॥ ૧૨૪ ॥

અસામ સુમતૌ યજ્ઞિયસ્ય । શ્રિયં બિભ્રતિઽન્નમુખીં વિરાજમ્ ।
સુદર્શને ચ ક્રૌઞ્ચે ચ । મૈનાગે ચ મહાગિરૌ ।
શતદ્વાટ્ટારગમન્તા । સꣳહાર્યન્નગરં તવ ।
ઇતિ મન્ત્રાઃ । કલ્પોઽત ઊર્ધ્વમ્ । યદિ બલિꣳ હરેત્ ।
હિરણ્યનાભયે વિતુદયે કૌબેરાયાયં બલિઃ ॥ ૧૨૫ ॥

સર્વભૂતધિપતયે નમ ઇતિ । અથ બલિꣳ હૃત્વોપતિષ્ઠેત ।
ક્ષત્રં ક્ષત્રં વૈશ્રવણઃ । બ્રાહ્મણા વયꣳ સ્મઃ ।
નમસ્તે અસ્તુ મા મા હિꣳસીઃ । અસ્માત્પ્રવિશ્યાન્નમદ્ધીતિ ।
અથ તમગ્નિમાદધીત । યસ્મિન્નેતત્કર્મ પ્રયુઞ્જીત ।
તિરોધા ભૂઃ । તિરોધા ભુવઃ ॥ ૧૨૬ ॥

તિરોધાસ્સ્વઃ । તિરોધા ભૂર્ભુવસ્સ્વઃ ।
સર્વેષાં લોકાનામાધિપત્યે સીદેતિ । અથ તમગ્નિમિન્ધીત ।
યસ્મિન્નેતત્કર્મ પ્રયુઞ્જીત । તિરોધા ભૂસ્સ્વાહા ।
તિરોધા ભુવસ્સ્વાહા । તિરોધાસ્સ્વસ્સ્વાહા ।
તિરોધા ભૂર્ભુવસ્સ્વસ્સ્વાહા ।
યમિન્નસ્ય કાલે સર્વા આહુતીર્ હુતા ભવેયુઃ ॥ ૧૨૭ ॥

અપિ બ્રાહ્મણમુખીનાઃ । તસ્મિન્નહ્નઃ કાલે પ્રયુઞ્જીત ।
પરસ્સુપ્તજનાદ્વેપિ । માસ્મ પ્રમાદ્યન્તમાધ્યાપયેત્ ।
સર્વાર્થાસ્સિદ્ધ્યન્તે । ય એવં વેદ ।
ક્ષુધ્યન્નિદમજાનતામ્ । સર્વાર્થા ન સિદ્ધ્યન્તે ।
યસ્તે વિઘાતુકો ભ્રાતા । મમાન્તર્હૃદયે શ્રિતઃ ॥ ૧૨૮ ॥

તસ્મા ઇમમગ્રપિણ્ડઞ્જુહોમિ । સ મેઽર્થાન્મા વિવધીત્ ।
મયિ સ્વાહા । રાજાધિરાજાય પ્રસહ્યસાહિને ।
નમો વયં વૈશ્રવણાય કુર્મહે । સ મે કામાન્કામકામાય મહ્યમ્ ।
કામેશ્વરો વૈશ્રવણો દદાતુ । કુબેરાય વૈશ્રવણાય ।
મહારાજાય નમઃ । કેતવો અરુણાસશ્ચ ।
ઋષયો વાતરશનાઃ । પ્રતિષ્ઠાઁ શતધા હિ ।
સમાહિતાસો સહસ્રધાયસમ્ । શિવાનશ્શન્તમા ભવન્તુ ।
દિવ્યા આપ ઓષધયઃ । સુમૃડીકા સરસ્વતિ ।
મા તે વ્યોમ સન્દૃશિ ॥ ૧૨૯ ॥

સંવત્સરમેતદ્ વ્રતં ચરેત્ । દ્વૌ વા માસૌ ।
નિયમસ્સમાસેન । તસ્મિન્નિયમવિશેષાઃ ।
ત્રિષવણમુદકોપસ્પર્શી । ચતુર્થકાલપાનભક્તસ્સ્યાત્ ।
અહરહર્વા ભૈક્ષમશ્નીયાત્ । ઔદુંબરીભિસ્સમિદ્ભિરગ્નિં પરિચરેત્ ।
પુનર્માંમૈત્ત્વિન્દ્રિયનિત્યેતેનાઽનુવાકેન । ઉદ્ધૃતપરિપૂતાભિરદ્ભિઃ કાર્યં કુર્વીત ॥ ૧૩૦ ॥

અસઞ્ચયવાન્ । અગ્નયે વાયવે સૂર્યાય ।
બ્રહ્મણે પ્રજાપતયે । ચન્દ્રમસે નક્ષત્રેભ્યઃ ।
ઋતુભ્યસ્સંવત્સરાય । વરુણાયારુણાયેતિ વ્રતહોમાઃ ।
પ્રવર્ગ્યવદાદેશઃ । અરુણાઃ કાણ્ડઋષયઃ ।
અરણ્યેઽધીયીરન્ । ભદ્રઙ્કર્ણેભિરિતિ દ્વે જપિત્વા ॥ ૧૩૧ ॥

મહાનામ્નીભિરુદકઁ સઁસ્પર્શ્ય । તમાચાર્યો દદ્યાત્ ।
શિવાનશ્શન્તમેત્યોષધીરાલભતે । સુમૃડીકેતિ ભૂમિમ્ ।
એવમપવર્ગે । ધેનુર્દક્ષિણા । કઁસં વાસશ્ચ ક્ષૌમમ્ ।
અન્યદ્વા શુક્લમ્ । યથાશક્તિ વા । એવઁ સ્વાધ્યાયધર્મેણ ।
અરણ્યેઽધીયીત । તપસ્વી પુણ્યો ભવતિ તપસ્વી પુણ્યો ભવતિ ॥ ૧૩૨ ॥

ૐ ભદ્રઙ્કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાઁ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૧૩૩ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

*TaittiriyAranyakam aruNaprashnaH*
pdf was typeset on February 18, 2025

Please send corrections to *sanskrit@cheerful.com*